CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S·A·P·13
Coll. No. 243

Title Mahāvandhavidhi

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 243 Subject : Tantric Ritual

Title : Mahārudra Vidhi

Author : — Scribe : —

Date of the work : — Date of the Ms. : -

Place of the work : — Place of the Ms. : —

Size : 11"·8" × 5"·7" Extent : 27 foll.

Language : Sanskrit Script : Devanāgarī

Remarks : Complete.

॥ॐश्रीगणेशायनमः॥ ॥आदौपूर्वदिनेप्रायश्चित्तं।तद्दिनेवा॥श्रीगणे०उनमः॥अद्य
श्रीम०देशेचा॥श्रीमन्महारुद्राख्यकर्मप्रारंभनिमित्तंयथाशक्त्याप्रायश्चित्तनिमित्तंश्री
विष्णोःषोडशभिरुपचारैःपूजनमहंकरिष्ये॥सहस्रशीर्षेतिषोडशर्चस्यसूक्तस्यश्रीना
रायणऋषिः।पुरुषोदेवता।पंचदशानुष्टुप्षोडशीत्रिष्टुप्श्रीविष्णोःषोडशभिरुपचा
रैःपूजनेविनियोगः॥प्रथमंस्वदेहेन्यासः॥तथाचविष्णोःन्यासंच॥ॐ॥सहस्रशीर्षा०१६ अ५
अस्यविष्णोःषोडशभिरुपचारैःपूजनकर्मणःप्र०र्थेयथासं०ब्राह्मणमेकंअहंतर्प
यिष्ये॥अस्यविष्णोः०र्थेहिरण्यद०द्रव्यंविष्णवेतेस्वाहा॥अस्यवि०पू०णायन्यू०र्णोस्तु॥
यस्यस्मृत्या०॥प्रायश्चित्तं॥ ॥अत्राद्य०प्रायश्चित्तमहंकरिष्ये॥ ॥नालिकेरग्रहणं॥
आब्रह्मस्तंब०तू॥यद्व०षं।श्लोकशा०प्रएयाहंद्दी०स्तु।पूर्वोक्तगु०चा।शास्त्रोक्तप्र०आत्म १
शुध्यर्थंश्रीमन्महारुद्राख्यकर्मणिकर्तृत्वेनअधिकारप्राप्त्यर्थंश्रीमहाविष्णुप्रीत्यर्थंप्रा
जापत्यप्रत्याम्नायत्वेनप्रतिप्राजापत्यंद्वादशब्राह्मणभोजनपरिगणनयायथा

संख्याब्राह्मणभोजननिष्क्रतिभूतंद्रव्यंयथापरिकल्पितप्रमाणंकस्मैचिद्ब्राह्मणाय
अहंसंप्रददे॥भगवान्श्रीमहाविष्णुःप्रीयतां॥अनेनप्राजापत्याचरणेनममदेहशु
द्धिरस्तु॥श्रीमन्महारुद्राख्यकर्मणिकर्तृत्वेनअधिकारप्राप्तिरस्तु॥पापोहंपा० हरी॥
यस्यस्मृत्या०॥ ॥अथाभ्युदयिकं॥ ॥श्रीगणेशा०मः३सुमुख०अद्याद्य०र्थेसुतस्य
विवाहोत्सवनिमित्तंश्रीमन्महारुद्राख्यकर्मप्रारंभनिमित्तंश्रीगणेशांबिकयोःप्रीत्यर्थं
आदित्या०र्थेआदि०साप्तु०र्थेगणेशगौर्यादिमातृणांवसोर्द्धा०ष्यो॥पुण्याहंदीर्घ०स्तु॥
दीर्घा।आयुरस्तु॥अस्यसुतस्यवि०त्ता॥श्रीमन्महारुद्राख्यकर्मप्रारंभनिमित्तंयथासं०
चतुरोब्रा०ष्ये।भगवत्यौग०यंतां॥ ॥अक्षतैः भूर्भुवःस्वः॥गणपतेइहागच्छइहति
ष्ठ॥१॥ॐभूर्भुवःस्वः॥गौरिइहागच्छइहतिष्ठ॥२ॐभूर्भुवःस्वः॥पद्मेइहागच्छइहतिष्ठ॥
३ॐभू०शचिइहा०ष्ठ४ॐभू०मेधेइहा०ष्ठ५ॐभू०सावित्रिइहा०ष्ठ६ॐभू०विजयेइ
हा०ष्ठ७ॐभू०जयेइहा०ष्ठ८ॐभू०देवसेनेइहा०ष्ठ९ॐभू०स्वधेइहा०१०ॐभू०

स्वाहेइदां॰ष११ॐस्वं॰मातरइदांग॰॥१२ॐस्वं॰लोकमातरं॰ॐस्वं॰धृते।इदां॰ष१४ॐस्वं॰
पुष्टेइदां॰१५ॐस्वं॰तुष्टेइदां॰१६ॐस्वं॰आत्माकुलदेवतेइदांगछइदंतिष्ठ॥१७॥ ॥
॥इतिप्रत्येकमावाह्य॥ ॥ॐतदस्तुमित्रावरु॰गणेशगो॰सुप्रति॰ष्ठ॥गणेशगो॰इद
मत्र।इदमनुलेपनं।इमानिपुष्पाणि।अयंधूपः।अयंदीपः।इदंनैवेद्यं।इदंतांबूलं॥
॥इतिगणेशपूजनं॥ ॥गौर्यैनमः।पद्मायैनमः।शच्यै।ॐमेधायै॰ॐसावित्र्यै॰ॐवि
जयायै॰ॐजयायै॰ॐदेवसेनायै॰ॐस्वधायैन॰ॐस्वाहायै॰ॐधृत्यै॰ॐपुष्ट्यैन ३
ई॰उग्रहप्र॰ मः।ॐआत्मकुलदेवतायैनमइति॥ ॥वसोर्द्धारायैइदमत्र।चं॰वसोर्द्धारायैनमः
॥अथनांदीमुखश्राद्धं॥ ॥ततःसग्रहविनायकशांतिः॥ततोगणपतिपूजास्वस्ति
श्च॥आचमनं॥प्राणायामः३॥गणाधिपतयेइदमत्र॰चं॰पु॰॥हेहेरंबत्वमेह्येहिअं २
बिकात्र्यंबकात्मज।सिद्धिबुद्धिपतेत्र्यक्षलक्षलाभपितःपितः।नागास्यनागहार
त्वंगणराजचतुर्भुज।भूषितःस्वायुधैर्दिव्यैःपाशांकुशपरश्वधैः।आवाहयामिपू

जार्थरक्षार्थंत्वांममक्रतोः।इहागत्यगृहाणत्वंपूजांक्रतुंचरक्षमे।इत्यावाह्यपूजयेत्॥
प्रारीप्सितमहारुद्रजपस्यहवनस्यच।निर्विघ्नेनसमाप्त्यर्थंगणेशंपूजयाम्यहं।सिंदू
रैरक्तचंदनैःपुष्पैर्धूपैःप्रपूजयेत्।रक्षरक्षगणाध्यक्षत्र्यक्षत्रैलोक्यरक्षक।भक्ताना
मभयंकर्त्तात्राताभवभवार्णवात्।द्वैमातुरकृपासिंधोषाण्मातुराग्रजोग्रज।वरदत्वं
वरंदेहिवांछितंवांछितार्थदः।गृहाणार्घमिमंदेवसर्वदेवनमस्कृत॥अनेनफलदा
नेनफलदोस्तुसदामम॥इत्यर्घः॥नमस्तेब्रह्मरूपायविष्णुरूपायतेनमः।नमस्ते
रुद्ररूपायकरिरूपायतेनमः।विरूपायसुरूपायनमस्तेब्रह्मचारिणे।भक्तप्रिया
यदेवायनमस्तुभ्यंविनायकँ।लंबोदरनमस्तुभ्यंसततंमोदकप्रिय।अविघ्नंकुरु
मेदेवसर्वकार्येषुसर्वदा॥विघ्नेश्वरायवरदायसुरप्रियायलंबोदरायसकलायजग
द्धिताय।नागाननायश्रुतियज्ञविभूषितायगौरीसुतायगणनाथनमोनमस्ते।भक्ता
र्त्तिनाशनपरायगणेश्वरायसर्वेश्वरायशुभदायसुरेश्वराय।विद्याधरायविकटाय

च वामनाय भक्तप्रसन्नवरदायनमोनमस्ते। त्वां विघ्नशत्रुदलनेति च सुंदरेति भक्तप्रिये
तिसुखदेति फलप्रदेति। विद्याप्रदेत्यघहरेति च ये स्तुवंति तेभ्यो गणेश वरदो भव नित्य
मेव॥ गणाधिपं नमस्कृत्य नमस्कृत्य पितामहं। विष्णुं रुद्रं शिवां देवीं वंदेव भक्त्या स
रस्वतीं॥ स्थानक्षेत्रं नमस्कृत्य दिननाथं निशाकरं। धरणीगर्भसंभूतं शशिपुत्रं बृहस्प
तिं। दैत्याचार्यं नमस्कृत्य सूर्यपुत्रं शनैश्चरं। राहुं केतुं नमस्कृत्य यज्ञारंभे विशेषतः।
शक्रादिदेवताः सर्वा मुनयश्च तपोधनाः। गर्गं मुनिं नमस्कृत्य नारदं पर्वतं तथा॥ वसिष्ठं त ६
मुनिशार्दूलं विश्वामित्रं च गोभिलं॥ व्यासं कण्वमृषीकेशं देवलं गोतमं त्तपं। अगस्त्यं च
पुलस्त्यं च दक्षपुत्रं पराशरं॥ अन्ये विद्यातपोयुक्ता वेदशास्त्रविचक्षणाः। सर्वेभ्यः प्रणि
पत्याहं यज्ञे रक्षां करोतु मे॥ ॥सुमुखश्चेत्यादि॥ स्वस्ति नो मिमीतां इति॥ ॥अस्य श्री २
मदादिनारायणस्या चिंत्यापरिमितशक्त्याध्रीयमाणस्य महाजलौघमध्ये परिभ्रम
माणस्यानेककोटिब्रह्मांडानामेकतमे व्यक्तमहदहंकारपृथिव्यप्तेजोवाय्वा

काशाद्यावरणैरावृतेऽस्मिन्महद्ब्रह्मांडमध्ये अतलवितलसुतलतलातलरसातलपा
तालमहापातालसप्तपातालस्योपरितने भूर्लोकभुवर्लोकस्वर्लोकमहर्लोकजनलो
कतपोलोकसत्यलोकस्याधोभागे आधारशक्तेः श्रीवराहकूर्मानंताष्टदिग्गजोपरि
प्रतिष्ठितस्योपरितने सत्यादिलोकखंडस्याधोभागे महाकालायमानस्य फणिराज
स्य महाशेषस्य सहस्रफणामणिमंडलमंडिते ऐरावतपुंडरीकवामनकुमुदांज
नपुष्पदंतसार्वभौमसुप्रतीका इत्यष्टदिग्दंतिशुंडादंडैर्दंडिते इंद्राग्नियमनैर्ऋ
तवरुणवायुकुबेरईशानादिदिक्पतिभिः प्रतिष्ठिते लोकालोकाचलवलयवलि
ते लवणेक्षुसुरासर्पिर्दधिक्षीरशुद्धोदकार्णवपरिवृते जंबूप्लक्षशाल्मलिकुशक्रौं
चशाकपुष्करसप्तद्वीपद्वीपिते इंद्रद्वीपकमेरुताम्रकगभस्तिनागसौम्यगंधर्वचा
रणभारतनवखंडखंडिते महासरोरुहाकारपंचाशत्कोटियोजनविस्तीर्णभूमं
डले सुमेरुनिषदरजतकूटशृंगकूटश्रीकूटहिमाचलानां हरिवर्षकिंपुरुषवर्ष

किंपुरुषवर्षसहस्रयोश्चदक्षिणेनसहस्रयोजनविस्तीर्णेमलयाचलसह्याचलविं
ध्याचलानांतरेणस्वर्णप्रस्थचंद्रप्रस्थसूक्तिकआवर्त्तकरमणकमहारमणकपां
चजन्यश्रीइलालंकेतिनवखंडमंडितेभरतखंडेभारतवर्षेजंबूद्वीपेचंपकारण्य
बदरिकारण्यदंडिकारण्यार्बुदारण्यपद्मारण्यधर्मारण्यब्रह्मारण्यगुह्यारण्यजंबु
कारण्यादीनांमध्येनैमिषारण्येब्रह्मावर्त्तैकदेशेकर्मभूमौस्वाम्यवंतिकुरुक्षेत्रादि
मध्येरेवायाःदक्षिणादिग्भागेकुमारिकाक्षेत्रेमहानद्याःआनंदकल्पस्थिरस्थायिदे
हपाविनीश्रीमत्तपनतनयायाःदक्षिणेतटेश्रीमद्भगवतोमहापुरुषस्याऽशेषपरा
क्रमस्यश्रीविष्णोराज्ञाप्रवर्त्तमानस्यसकलकल्याणवतिभूम्यस्मिन्नायतनेयथा
देवब्राह्मणानांसन्निधौश्रीमत्स्वकलजगत्स्रष्टुंपरार्द्धद्वयजीविनोब्रह्मणःप्रथम ५
परार्द्धेपंचाशदतीतेद्वितीयपरार्द्धेपंचाशताधिकवर्षेप्रथममासेप्रथमपक्षेप्रथमे
ह्ननिद्वितीयेयामेतृतीयेमुहूर्त्तेचतुर्द्दशमन्वंतराणांमध्येवैवस्वतमन्वंतरेसप्त

विंशतिर्महायुगानिगतानियुगानांत्रिषुयातेषुचतुर्लक्षद्वात्रिंशत्सहस्राधिकसंख्येन
व्यतीतगतेनतत्प्रथमचरणेसप्तदशात्यधिकायाउपरिचतुश्चत्वारिंशदधिकेदेचांद्रसा
वनसौरनक्षत्रादिभ्रमितप्रभवादिषष्टिसंवत्सराणांत्रितयविंशतिकानांमध्येईश्वर
नाम्निसंवत्सरेअमुकगोलावलंबितश्रीमन्मार्तंडमंडलेअमुकर्तौअमुकमासेप
क्षेतिथौवारेनक्षत्रेयोगेकरणेएवंगुणविशिष्टेपुण्येकालेदेशेच।शास्त्रोक्तपुण्यफ
लावाप्तयेचअमुकराशिस्थितेश्रीमन्मार्तंडबिंबेअमुकराशिगतेश्रीनिशानाथेअ
मुकराशिस्थितेअमराचार्येममक्षेमआयुरारोग्यपरमश्रीसुखावाप्तयेममसर्वकुटुं
बस्यसर्वविघ्नोपशांतयेउत्पन्नोत्पत्स्यमानोपसर्गोपसृष्टनष्टयेस्त्रीपुत्रधनधान्यादि
कामनापरिपूर्त्तयेप्राकृजन्मकोटिलग्नानांगुरुलघ्वादिपाप्मनांमत्याऽमत्यासक्तनि
त्याऽभ्यासकृतांहसांमहापापादिपापानांसर्वेषांचानुपपत्तयेप्रीतयेपरमेशस्यन्नृ
रिनावाप्तयेपुनकृतस्यक्रियमाणस्यकरिष्यमाणस्यकर्मणःसम्यगुप्तफलावाप्त्ये

प्राप्त्यैश्रेयसश्चात्मनः।श्रीमन्महारुद्राख्यकर्मजपारंभहवनांतनिमित्तकंभार्यादिपुत्र
सभार्यस्यचिंतितार्थस्यसिद्धयेआधिजरामृत्युभयशोकनिवृत्तये।भूतभव्यभविष्ये
तित्रिविधोत्पातशांतये।सर्वैनसामपध्वस्त्यैनिरस्त्यैचादिशाद्विषां।परमैश्वर्यसंपत्त्यै
निःपत्त्यैजपकर्मणः।ब्रह्माचार्यादिसमस्तानांजापकानांपादार्घ्यंकरिष्ये।ऊरुषोक्ताः
र्घस्तदुच्छीयार्घपात्रंहस्तेगृहीत्वाप्राङ्मुखान्जापकान्प्रतिस्वयमुदङ्मुखोवदेत्।
दधिदुग्धंयवाद्दूर्वागंधाःसिद्धार्थसंयुताः।जलपुष्पसमायुक्तःपादार्घएभिरष्टभिः।
पावनाःसर्ववर्णानांब्राह्मणाःब्रह्मरूपिणः।अनुगृह्णंतुमेअर्घंमहारुद्राख्यकर्मणि।
स्वस्वकर्मरतानित्यंवेदशास्त्रार्थकोविदाः।श्रोत्रियाःसत्यवक्तारोरुद्रध्यानरताःस
दा।यद्वाक्यामृतसंसिक्ताःवृद्धिंयांतिनरद्रुमाः।अंगीकुर्वंतुमत्कर्मकल्पद्रुमसमाशि ५
षः।यथोक्तनियमैर्युक्तामंत्रार्थस्थिरबुद्धयः।यत्कृपालोकनात्सर्वाऋद्धयोवृद्धिमाप्नु
युः।स्वागतंवोद्विजश्रेष्ठामदनुग्रहकारकाः।इदमर्घ्यमिदंपाद्यंभवद्भिःप्रतिगृह्यतां।

अर्घोऽः प्रतिगृह्यतां।ॐप्रतिगृह्णामि।ततःआसनेप्राङ्मुखउपविश्योदङ्मुखस्यब्रह्मणः
चरणक्षालनंकलशस्थयमुदङ्मुखःप्राङ्मुखआचार्यादीनांपादप्रक्षालनंकुर्यात्।तद्य
थाश्रीमन्महारुद्राख्यकर्मणिब्रह्मन्एतत्तेपाद्यं।इत्यादिसर्वेषां।ततिकुचरणोदके
नआत्मानंपरिवांचसंप्रोक्ष्यस्थलांतरंगत्वोपविश्यात्मनश्चरणौक्षालयित्वाचम्यवे
दघोषपुरःसरंमंडपंप्रदक्षिणीकृत्यपश्चिमद्वारेणप्रविशेत्।तत्रपश्चिमवेद्यामुत्तर
वेद्यांवाउपविश्यवरुणश्राद्धंकुर्यात्।प्रथमंस्योनापृथिवीनवेतिभूमिप्रार्थनं।चतुर्भु
जांशुक्लवर्णांकूर्मपृष्ठोपरिस्थितां।पद्मस्वस्तिकांशूलधरांसुप्रसन्नांचतुर्मुखां।आगच्छ
सर्वकल्याणिवसुधेलोकधारिणी।पृथिवीब्रह्मदत्तासिकाश्यपेनाभिवंदिता॥इति
नमस्कारः।प्रार्थनं।उद्धृतासिवराहेणकृष्णेनशतबाहुना।दंष्ट्रायेनीलयादेविजपा
र्थंप्रणमाम्यहं।श्रीफलेनार्घः।प्रणमस्व।अन्नपतेन्नस्यैधेहितिसप्तधान्यंसर्षपाक्षे
पः।अथकृतत्रासनं॥नित्वादधेवरेण्यमिति।उत्तिष्ठंत्रमहद्भूतायेचात्रस्थानवा

सिनः।भूतानामविरोधेनघ्याचरामोवयंजपं।रक्षोहणंवाजिनमंरक्षोहाविश्वचर्षणिरि
ति।अपसर्पंतुयेभूतायेभूताभुविसंस्थिताः।येभूताविघ्नकर्तारस्तेनश्यंतुशिवाज्ञया॥
ॐह्रींफट्स्वाहा।एभिर्मंत्रैःसर्षपान्हस्तेश्चतुर्दिशिसर्वतोविक्षिप्तेभूतानुत्सादयेत्।
अथवरुणश्राद्धं॥आचमनंप्राणायामः।स्वस्त्ययनं।आचार्यादीन्पूर्वाभिमुखानुप
वेशयेत्।उत्तराभिमुखःस्वयंदक्षिणेपत्नीविष्टरोपदारास्थापनीया।ॐअपवित्रः
पवित्रोवेत्यादिवरणश्राद्धे॰रक्षा।उपास्मै॰मधुश्च॥अद्येत्यादिश्रीमन्महारुद्राख्यकर्म
प्रारंभनिमित्तंश्रीमन्महारुद्रप्रीत्यर्थंब्रह्माआचार्यादीनांवरणमहंकरिष्ये।ॐकु
रुष्व।ततउदङ्मुखस्यब्रह्मणःदक्षिणंजानुआलभ्यगोत्रंप्रवरंशाखाध्यायिनंअमुका
मुकशर्माणंब्रह्माणंत्वामहंवृणे।वृतोस्मीतिप्रत्युक्तिः।आवाहयामिदेवेशंब्रह्माणं
कमलोद्भवं।चतुर्वेदसमायुक्तंसर्वसिद्धांतवेदिनं।सुगोत्रंप्रवरंविप्रंशाखावेदसम
न्वितं।कर्मज्ञंकर्मसंपत्त्यैब्रह्माणंत्वामहंवृणे।यथाचतुर्मुखोब्रह्मासर्ववेदविद्वा

रदः।तथात्वंममयज्ञेस्मिन्ब्रह्मत्वेनवससर्वदा।ब्रह्मज्ञन्यानमितिपठेत्।ततोआचार्य
वरणंगोत्र॰आवाहयामिदेवशर्माचार्ययज्ञकारिणं।पुराणन्यायमीमांसावेदशा
स्त्रार्थपारगं।गोत्रप्रवरसंयुक्तंशाखावेदसमन्वितं।कर्मसंपादनायाहमाचार्यत्वाम
हंवृणे।आचार्यस्तुयथास्वर्गेशक्रादीनांबृहस्पतिः॥तथात्वंममयज्ञेस्मिन्नाचार्योभ
वद्विज।बृहस्पतेऽत्रि॰त्रं।ततोजापकान्पृथक्वरणं।अथवाएकतंत्रेण।नाना
गोत्राःनानानामानःनानाशर्माणःनानाप्रवराःस्वेस्वेकर्मणितत्पराःवेदमधीयानाः
श्रुताध्ययनसंपन्नाःपंक्तिपावनाश्चानूचानाश्चयूयंमयावृतास्थ।वृतास्मेतिप्रत्यु
क्तिः।यथावेदायथाब्रह्मायथायज्ञास्तथैवमे।प्रवृज्याजापकायूयंजपयज्ञप्रसिद्धये।
गौतमात्रिभरद्वाजवसिष्ठाद्यैःसमर्चिताः।गोत्रप्रवरसंयुक्ताःशाखावेदसमन्विताः।
जपकर्मणिसंयुक्तावेदाध्ययनतत्पराः।सर्वसिद्धिकरास्तस्माद्युष्मानिहवृणोम्य
हं।वृतास्मइतिप्रत्युक्तिः।चतुर्द्वारस्थितायूयंवेदपारायणंशुभं।कर्त्तुंसमर्थाः।

सत्यस्थाएतदर्थंमहंवृणे।वृतास्मः।योपमृत्युहरोजप्तोमृत्युंजयमनुःश्रुतः।जपक
र्मविदंत्वांतंतदर्थंत्वामहंवृणे।अरातिचयविध्वंसोनानादुरितसंक्षयः।दुर्गाप्रसादा
द्भवतिजपार्थंत्वांवृणोम्यहं।यथादत्तान्यासनानिब्राह्मणेआचार्यायऋत्विग्भ्यश्चसं
प्रददे।अत्रचंदनादिपूजा।यथादत्तानिचंदनगंधपुष्पवस्त्रकुंडलमुद्रिकादीनि
ब्राह्मणप्रमुखेभ्यऋत्विग्भ्यश्चसंप्रददे।इमानिअर्चितानिज्योतींषि।अर्चनं०स्त।आच
मनं।ॐभूर्भुवःस्वः।अद्यतन्नमी०री।दास्यमानंभोजनंब्राह्मणेआचार्यायऋत्विग्भ्यःआ
समाप्तेःयथासंपन्नेनान्नेनतृप्तिपर्यंतेनभोजनेनाहंतर्पयिष्ये।पुण्याहं०दक्षिणा
संकल्पः।अस्यवरणश्राद्धकर्मणो०स्त।आशीर्वादाः।ततोमधुपर्कः।ततःपुण्याहवा
चनं।ततःप्रार्थना।ब्राह्मणाःसंतुमेशांताःपापात्पांतुसमाहिताः।देवानांचैवदाता १
रःपातारःसर्वदेहिनां।जपयज्ञैस्तथाहोमैर्दानैश्चविविधैःपुनः।देवानांचपितृणां
चरक्षार्थंयाजकाःस्मृताः।येषांदेहस्थितावेदाःपावयंतिजगत्त्रयं।रक्षंतुसततंते

मांजपयज्ञेव्यवस्थिताः।महारुद्रजपेपूज्याःसंतुतेनियमान्विताः।अक्रोधनाःशौचपराःस
ततंब्रह्मचारिणः।रुद्रध्यानरतानित्यंप्रसन्नमनसःसदा।माक्षीषभाषणाःसंतुमासंतुप
रनिंदकाः।ममाप्येतेहिनियमान्भवंतुभवतामपि।आसमाप्तेर्हिनियमान्भवंतुसततं त
द्विजाः।अथब्राह्मणाब्रूयुः।एवंनियमसंयुक्तातवकर्त्तव्यतत्पराः।कार्यंतवकरिष्या
मोविधिपूर्वेनसंशयः।कर्त्तव्यानाक्रियाशंकावेदाज्ञाहिगरीयसी।वैदिकानहिवेदा
ज्ञांलंघयंतिकदाचन।त्वदधीनंत्वयाकार्यंनिःशंकंश्रद्धयान्वितं।वयमेतत्करिष्या
मस्तवकार्यंनसंशयः॥ ॥अथयजमानः॥ ॥धन्योहंकृतकृत्योहंसौभाग्योहंध
रातले।प्रसादाद्भवतांविप्राःपवित्रोहंकृतोधुना।मेरुमंदरतुल्योहंभवद्भिर्भूतले
कृतः।यशोविस्तारितंमेघलक्ष्मीर्वृद्धिश्चमेकृता।अद्यमेपितरस्तृप्ताःपवित्रंमेकुलं
कृतं।देवतानांप्रसादोपिजातोमेद्यैवनिर्मलः।कार्यंकर्तुंनमेशक्तिर्नैवदातुंचदक्षि
णां।नचपूजांविधातुंचनमस्कारंकरोम्यहं।शक्त्यासर्वंकरिष्यामिवचनाद्भवतांचत

तु।दयाशीर्वादसिंधूनांपूर्णंसर्वंत्रविष्णनि।इत्थंसंप्रार्थ्यतानूब्रूयाद्यथावक्रियतांजपः॥त
तोजापकाःजपध्वं।पाठकाःपठध्वं।इतियजमानःदंडवत्प्रणामः।ततोऽस्ततैःपंचपूरयिता
कलशापूरणार्थंवर्द्धनीकलशंस्थापयेत्।तत्रविधिः॥स्योनापृथिव्यादिदशमंत्रेणस्था
पयित्वा।प्रतिष्ठायां०प्रतिकलशेषुदर्भमयींप्रतिमांनिधाय॥ततोवर्द्धनीप्रार्थना॥ ॥
मृन्मयित्वंसतीपूतामहातीर्थोदकान्विता।वर्द्धनित्वंजगन्माताऽन्नवत्वंकुलवर्द्धनी।त्व
त्तोयेनकलशानूजपार्थंपूरयाम्यहं।देवदानवसंवादेमथ्यमानेमहोदधौ।उत्पन्नोसि
तदाकुंभविधृतोविष्णुनास्वयं।त्वत्तोयेसर्वतीर्थानिसर्वेदेवास्त्वयिस्थिताः।त्वयितिष्ठंति
भूतानित्वयिप्राणाःप्रतिष्ठिताः।शिवःस्वयंत्वमेवासित्वंविष्णुस्त्वंप्रजापतिः।आदित्यावस
वोनागाविश्वेदेवाःसपैतृकाः।त्वयितिष्ठंतिसर्वेपियतःकामफलप्रदाः।त्वत्प्रसादादिमं
यज्ञंकर्त्तुमीहेजलोद्भव।सान्निध्यंकुरुदेवेशप्रसन्नोभवसर्वदा।ततआचार्यऋत्विकू
सहितोयजमानःसपत्नीकोवर्द्धनीगृहीत्वाशांतिपाठंपठन्नूजपस्थानेगत्वाएकादशाकु

भावर्द्धन्फदकेनस्नपनीयाः ।सर्वे पूर्ववन्मंत्रेणस्थापनीयाः ।दीपाश्च ।मध्ये रुद्रं स्थापया
मि ।अघोरः ।पशुपतिः ।शर्वः ।विरूपः ।विश्वरूपः ।त्र्यंबकः ।कपर्दी ।शूलपाणिः ।भैरवः ।
ईशानः ।महेशानः ।इत्येकादशकलशेषु दक्षिणतः स्थापनीयाः ।तेषां आवाहनं ।।
आयांतु सन्निधौ रुद्राः कलशास्थासु मूर्त्तिषु ।रुद्राणीसहिताः सर्वे सगणाः सर्वैमरु
द्गणाः ।गंधैः पुष्पैश्च धूपैश्च दीपैर्नैवेद्यैश्च तुर्विधैः ।पूज्याः पंचोपचारैश्च रुद्राः सर्वे पृथ
क् ।ॐ स्थापितरुद्रेभ्यः सांगेभ्यः कल्पितं मया ।गंधपुष्पादिनैवेद्यं तन्नेगृह्णंतु भ
क्तितः ।रुद्रपूजाविधेर्न्यूनमतिरिक्तं च यद्भवेत् ।रुद्रविप्रप्रसादेन परिपूर्णं तदस्तु
मे ।। ।।ततो भूतशुद्ध्यादित्वा रुद्रविधानं कुर्यात् ।। ।।गोमयमंडलेकंबलाद्या
सने धास्यसर्षपाक्षतरक्षया ।अपसर्पंतु ते भूता ये भूता भुवि संस्थिता ।ये भूता विघ्नकर्त्ता
रस्ते नश्यंतु शिवाज्ञया ।ॐ ह्रीं फट् स्वाहेति मंत्रेण भूतान्प्रसारयेत्ततः ।।आचम्य ।।
प्राणानायम्य ।।त्रिनत्वा गुरुविप्रान् ।।महादेवस्य पुरतो देशकालानुकीर्त्तनं ।। ।।

॥प्रयोगः॥अत्राद्य॰श्रीमन्महारुद्रस्याराधनार्थंतद्योग्यतासंपत्तयेभूतशुद्धिमहं
करिष्ये॥ ॥तत्रमूलाधारेतडित्कोटिसमप्रभांबिसतंतुतनीयसीं॥सार्द्धत्रिवलया
कारांवर्णमयींकुंडलिनींभुजगोपमांसंचिंत्यप्रणवेनअंकुशमुद्रयातदुत्थाप्यसुषुम्ना
मार्गेणब्रह्मरंध्रंनीत्वाब्रह्मरंध्रस्थशिवेचित्स्वरूपंजीवेनियोजयेत्॥तत्रस्मरणं॥हका
रंलकारमध्येप्रविलाप्य॥पंचभूतानिध्यायेत्॥पादादिजानुपर्यंतंपृथिवीस्थानं॥
तत्रपार्थिवमंडलंचतुरस्रंअष्टदिक्षुवज्रलांछितंतन्मध्येलंबीजंपीतवर्णंतेनपं
चगुणापृथिवींषड्गुणोद्घातप्रयोगेणशोषयामि॥ॐहंलंफट्॥जान्वादिनाभिपर्यंतं
अपांस्थानंतत्रवारुणंमंडलंधनुराकारंतन्नयोःकद्वयोःश्वेतपद्मलांछितंतन्मध्येवं
बीजंशुक्लवर्णंतेनचतुर्गुणा॥आपःपंचोद्घातप्रयोगेणशोषयामि॥ॐवंहंफट्॥ना ९
भ्यादिहृदयपर्यंतंअग्निस्थानंतत्रत्रिकोणंवह्निमंडलंकोणत्रयेस्वस्तिकैरलंकृतं
तन्मध्येरंबीजंरक्तवर्णंतेनत्रिगुणंवह्निंचतुरुद्घातप्रयोगेणशोषयामि॥ॐरंहं

फट्॥हृदयादिभ्रूमध्यपर्यंतंवायुस्थानंतत्रवर्त्तुलंवायुमंडलंषड्बिंदुलांछितंतन
न्मध्येयंबीजंधूम्रवर्णंतेनद्विगुणंवायुंत्रिरुद्धातप्रयोगेणशोषयामि॥ॐयंहंफट्॥भ्रू
मध्यात्ब्रह्मरंध्रपर्यंतंआकाशवर्त्तुलंनभोमंडलंश्वेतध्वजलांछितंतन्मध्येहंबीजं
नीलवर्णंतेनैकगुणंनभःद्विरुद्धातप्रयोगेणशोषयामि॥ॐमूंहंहंफट्॥ध्यानं॥ ॥
पापपुरुषस्य॥ब्रह्महत्याशिरस्कंचसुवर्णस्तेयभुजद्वयं।सुरापानहृदायुक्तंगुरुत
त६ ल्पकटिद्वयं।यत्संयोगिपदद्वंद्वमंगप्रत्यंगपातकं।उपपातकरोमाणंरक्तश्मश्रुविलो
चनं।खड्गचर्मधरंस्त्रष्टंकुक्षौपापंविचिंतयेत्।ततःपापपुरुषंदहनंकुर्यात्।यमि
तिवायुबीजस्यक्लिक्लिधऋषि।जगतीछंदः।महावायुत्नवरूपीदेवता।यंबीजंबिंदुश
क्तिःतेनमहाप्रलयवायुनास्मत्मनोवाक्कायकृतपापपुरुषंशोषयामि॥ ॥वायु
धारणं॥पूरक१६ कुंभक६४ रेचक३२॥एवंसर्वत्र॥रमित्यस्याग्निबीजस्यकश्यपऋ
षिः।जातवेदाग्निर्देवता।रंबीजंबिंदुशक्तिः।तेनसंमिद्धमहाप्रलयाग्निनातंपाप

पुरुषंसंदहेत्।वमित्यमृतबीजस्यहिरण्यगर्भऋषिः।गायत्रीछंदः।परमात्मादेवता।
वंबीजंबिंदुशक्तिः।अस्मिन्मनोवाक्कायजनितपापपुरुषाधिष्ठितंदग्धशरीरंतस्मात्प्लावने
विनियोगः॥ब्रह्मरंध्रस्थितंचंद्रमंडलकमलकर्णिकामध्यवर्त्तितद्बीजस्रवदमृतधा
रासहस्रैःकलेवरमापूरितंध्यायेत्।लमितिपृथिवीबीजस्यवाराहऋषिः।गायत्रीछंदः
पृथ्वीदेवता॥लंबीजं।बिंदुशक्तिः।तेनबीजेनतद्भस्मपुंजंकठिनमंडंहिरण्मयंजातं॥
हमित्याकाशबीजस्यपरमेष्ठीप्रजापतिर्ऋषिः।गायत्रीछंदः।आकाशोदेवता।हंबीजं।
बिंदुशक्तिः।तेनबीजेनद्वारविवरंजातांडंप्रविश्य।ततःद्वादशांतेस्थितजीवात्मसोहं
मंत्रेणस्वहृदयारविंदेसमीयप्राणप्रतिष्ठांकुर्यात्॥अस्यप्राणप्रतिष्ठामंत्रस्यब्रह्म
विष्णुरुद्राऋषयः।ऋग्यजुःसामानिछंदांसि।क्रियामयवपुः।प्राणाख्यादेवता।आंबी १०
जं।ह्रींशक्तिः।क्रोंकीलकं।प्राणप्रतिष्ठार्थेजपेविनियोगः।ब्रह्मविष्णुरुद्राऋषयः॥
शिरसि॥ऋग्यजुःसामानिछंदांसि॥मुखे॥प्राणशक्तिर्देवता॥हृदि॥आंबीजं।नाभौ॥

क्लींशक्तिर्गुह्ये।क्रोंकीलकं।पादयोः॥इतिऋष्यादि॥ ॥ॐअँकँखँगँघँङँआँआँअंगुष्ठाभ्यां
नमः॥ॐइँचँछँजँझँञँईँक्लींतर्जनीभ्यांनमः॥ॐउँटँठँडँढँणँऊँक्रोंमध्यमाभ्यांनमः॥ॐ
एँतँथँदँधँनँऐँआँअनामिकाभ्यांनमः॥ॐॐपँफँबँभँमँओँक्लींकनिष्ठिकाभ्यांनमः॥ॐ
औँयँरँलँवँशँषँसँहँळँक्षँअः क्रोंकरतलपृष्ठाभ्यांनमः॥इतिकरन्यासः॥ ॥ॐअँकँखँ
गँघँङँआँआँआकाशवायुतेजोजलपृथिव्यात्मनेहृदयाय०॥ॐइँचँछँजँझँञँईँक्लीं
शब्दस्पर्शरूपरसगंधात्मनेशिरसे०॥ॐउँटँठँडँढँणँऊँक्रोंश्रोत्रत्वक्चक्षुजिह्वाघ्रा
णात्मनेशिखायैवषट्॥ॐएँतँथँदँधँनँऐँआँवाक्पाणिपादपायूपस्थात्मनेकवचाय
हूं॥ॐॐपँफँबँभँमँओँक्लींवचनादानगतिविसर्गानंदात्मनेनेत्रत्रयायवौषट्॥ॐअँ
यँरँलँवँशँषँसँहँळँक्षँअः क्रोंमनोबुध्यहंकारचित्तात्मनेअस्त्रायफट्॥इतिषडंगः॥ ॥
ॐआँनमःनाभ्यादिपादपर्यंतंन्यसेत्॥ॐक्लींनमःहृदयादिनाभिपर्यंतंन्यसेत्॥ॐक्रों
नमःमस्तकादिहृदयपर्यंतंन्यसेत्॥ॐयंनमःब्रह्मरंध्रे।ॐरंनमःसीमंते॥ॐलंनमः

ललाटे॥ ॐ वं नमः भ्रूमध्ये॥ ॐ शं नमः कंठकूपे॥ षं नमः हृदये॥ ॐ सं नमः नाभौ॥ ॐ हं
नमः लिंगे॥ ॐ क्षं नमः मूलाधारे॥ ॥इति चिंत्य प्राणशक्तिं ध्यायेत्॥ ॥रक्तांभोधि
स्थपोतोल्लसदरुणसरोजाधिरूढाकराब्जैः पाशं कोदंडमिक्षूद्भवमथिगुणमप्यंकु
शं पंचबाणान्॥ बिभ्राणासृक्कपालं त्रिनयनविलसत्पीनवक्षोरुहाढ्या देवी बाला
र्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः॥ ॥इति ध्यात्वा हृदि करतलं निधाय॥
ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं क्षं सोहं मम प्राणा इह प्राणाः॥ ॐ आं ह्रीं क्रों यं ए सो
हं मम जीव इह स्थितः॥ ॐ आं ह्रीं क्रों यं ए सोहं मम सर्वेंद्रियाणि॥ ॐ आं ह्रीं क्रों यं ए सो
हं मम वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणप्राणा इहैवागत्य सुखं चिरं तिष्ठंतु स्वाहा॥ ॥
॥इति त्रिः पठेत् प्राणप्रतिष्ठा॥ ॥अथ मातृकान्यासः॥ ॥अस्य श्रीमातृकासरस्वतीमं
त्रस्य ब्रह्मा ऋषिः शिरसि॥ गायत्री छंदः मुखे॥ मातृकासरस्वती देवता हृदि॥ हलः बीजा
नि नाभौ॥ स्वराः शक्तयः गुह्ये॥ व्यक्तयः कीलकं पादयोः॥ ॐ रुद्रांगत्वेन न्यासे विनियो

गः। करसंपुटे। ॐ अं कं खं गं घं ङं आं अंगुष्ठाभ्यां नमः। ॐ इं चं छं जं झं ञं ईं तर्जनीभ्यां
नमः। ॐ उं टं ठं डं ढं णं ऊं मध्यमाभ्यां नमः। ॐ एं तं थं दं धं नं ऐं अनामिकाभ्यां नमः। ॐ
ॐ पं फं बं भं मं औं कनिष्ठिकाभ्यां नमः॥ ॐ अं यं रं लं वं शं षं सं हं ळं अः करतलपृष्ठाभ्यां
नमः॥ इति करन्यासः॥ ॐ अं कं ५ आं हृदयाय नमः। ॐ इं चं ५ ईं शिरसे स्वाहा। ॐ उं
टं ५ ऊं शिखायै वषट्॥ ॐ एं तं ५ ऐं कवचाय हुं॥ ॐ ॐ पं ५ औं नेत्रत्रयाय वौषट्॥ ॐ अं
यं ५ अः अस्त्राय फट्॥ ॥इति षडंगः॥ ॥ततः स्वरैः पूरकं॥ कादिपंचकैः कुंभकं॥ या
दिभी रेचकमिति॥ त्रिः प्राणानायम्य॥ ॥अंतर्मातृकां ध्यायेत्॥ ॥आधारे लिंगनाभौ
हृदयशिरसि जे तालुमूले ललाटे द्वे पत्रे शोडशारे द्विदशदशयुते द्वादशार्द्धे चतुष्के॥
वासांते बालमध्ये डफकठसहिते कंठमध्ये स्वराणां हं क्षं तत्वार्थयुक्तं सकलदलयु
तं वर्णरूपं नमामि॥ इति ध्यात्वा कंठदेशे विशुद्धे षोडशदलेषु प्रादक्षिण्येन॥ ॐ अं न
मः। ॐ आं नमः। ॐ इं नमः। ॐ ईं नमः। ॐ उं नमः। ॐ ऊं नमः। ॐ ऋं नमः। ॐ ॠं नमः। ॐ लृं न

मः। ॠं नमः। ॐ एं नमः। ॐ ऐं नमः। ॐ ओं नमः। ॐ औं नमः। ॐ अः नमः। एवं षोडशदलानू
विन्यस्य॥ ॥हृदयस्थनाहते द्वादशदलेषु प्रादक्षिण्येन॥ ॐ कं नमः। ॐ खं नमः।
ॐ गं नमः। ॐ घं नमः॥ ॐ ङं नमः। ॐ चं नमः। ॐ छं नमः। ॐ जं नमः। ॐ झं नमः। ञं नमः।
ॐ टं नमः। ॐ ठं नमः। एवं द्वादशदलानू विन्यस्य॥ ॥नाभौ मणिपूरे दशदले
षु प्रादक्षिण्येन॥ ॐ डं नमः। ॐ ढं नमः। ॐ णं नमः। ॐ तं नमः। ॐ थं नमः। ॐ दं नमः।
ॐ धं नमः। ॐ नं नमः। ॐ पं नमः। ॐ फं नमः। एवं दशवर्णानू विन्यस्य॥ ॥
लिंगे स्वाधिष्ठाने षट्दलेषु प्रादक्षिण्येन। ॐ बं नमः। ॐ भं नमः। ॐ मं नमः। ॐ रं ॐ यं न० ५
नमः। ॐ लं नमः। एवं षड्वर्णानू विन्यस्य॥ ॥शिवेन्यां मूलाधारे चतुर्दले
षु प्रादक्षिण्येन॥ ॐ वं नमः। ॐ शं नमः। ॐ षं नमः। ॐ सं नमः॥ एवं चतुर्वर्णान्वि १२
न्यस्य॥ ॥भ्रूमध्ये आज्ञायां द्विदलयोः ॐ हं नमः दक्षे॥ ॐ क्षं नमः वामनेत्रे॥ ॥ततः
ब्रह्मरंध्रे सहस्रारे। सहस्रदलकर्णिकायां त्रिकोणं विभाव्य॥ त्रिपुरे रेखासु प्रदक्षि

गः। करसंपुटे। ॐ अं कं खं गं घं ङं आं अंगुष्ठाभ्यां नमः। ॐ इं चं छं जं झं ञं ईं तर्जनीभ्यां न
मः। ॐ उं टं ठं डं ढं णं ऊं मध्यमाभ्यां नमः। ॐ एं तं थं दं धं नं ऐं अनामिकाभ्यां नमः। ॐ ओं पं
फं बं भं मं औं कनिष्ठिकाभ्यां नमः॥ ॐ अं यं रं लं वं शं षं सं हं ळं क्षं अः करतलपृष्ठाभ्यां नमः॥ ॥
॥इति करन्यासः॥ ॐ अं कं ५ आं हृदयाय नमः। ॐ इं चं ५ ईं शिरसे स्वाहा। ॐ उं टं ५ ऊं शिखा
यै वषट्॥ ॐ एं तं ५ ऐं कवचाय हुं॥ ॐ ओं पं ५ औं नेत्रत्रयाय वौषट्॥ ॐ अं यं १० अः अस्त्राय
फट्॥ ॥इति षडंगः॥ ॥ततः स्वरैः पूरकं॥ कादिपंचकैः कुंभकं॥ यादिभी रेचकमिति॥
त्रिः प्राणानायम्य॥ ॥अंतर्मातृकां ध्यायेत्॥ ॥आधारे लिंगनाभौ हृदयशिरसि जे तालु
मूले ललाटे द्वे पत्रे शोडशारे द्विदशदशयुते द्वादशार्द्धे चतुष्के॥ वासांते बालमध्ये डफकग
सहिते कंठमध्ये स्वराणां हं क्षं तत्वार्थयुक्तं सकलदलयुतं वर्णरूपं नमामि॥ इति ध्यात्वा
कंठदेशे विशुद्धे षोडशदलेषु प्रादक्षिण्येन॥ ॐ अं नमः। ॐ आं नमः। ॐ इं नमः। ॐ ईं नमः।
ॐ उं नमः। ॐ ऊं नमः। ॐ ऋं नमः। ॐ ॠं नमः। ॐ ऌं नमः। ॡं नमः। ॐ एं नमः। ॐ ऐं नमः। ॐ ओं न

मः।ॐ औं नमः।ॐ अं नमः।ॐ अः नमः।एवं षोडशदलानुविन्यस्य॥ ॥हृदयस्थानाहते द्वाद
शदशदलेषुप्रादक्षिण्येन॥ॐ कं नमः।ॐ खं नमः।ॐ गं नमः।ॐ घं नमः॥ॐ ङं नमः।ॐ चं
नमः।ॐ छं नमः।ॐ जं नमः।ॐ झं नमः।झं नमः।ॐ टं नमः।ॐ ठं नमः।एवं द्वादशदलानु
विन्यस्य॥ ॥नाभौ मणिपूरे दशदलेषुप्रादक्षिण्येन॥ॐ डं नमः।ॐ ढं नमः।ॐ णं नमः।
ॐ तं नमः।ॐ थं नमः।ॐ दं नमः।ॐ धं नमः।ॐ नं नमः।ॐ पं नमः।ॐ फं नमः।एवं दशवर्णान्
विन्यस्य॥ ॥नाभौ मणिपूरे दशदलेषुप्रादक्षिण्येन॥ॐ डं नमः।ॐ ढं नमः।ॐ णं नमः।
ॐ तं नमः।ॐ थं नमः।ॐ दं नमः।ॐ लिंगे स्वाधिष्ठाने षट्दलेषुप्रादक्षिण्येन।ॐ बं नमः।ॐ
भं नमः।ॐ मं नमः।ॐ रं नमः।ॐ लं नमः।एवं षड्वर्णानुविन्यस्य॥ ॥शिवेन्यां मूलाधारे
चतुर्दलेषुप्रादक्षिण्येन॥ॐ वं नमः।ॐ शं नमः।ॐ षं नमः।ॐ सं नमः॥एवं चतुर्वर्णानुवि १२
न्यस्य॥ ॥भ्रूमध्ये आज्ञायां द्विदलयोः।ॐ हं नमः।दक्षे॥ॐ क्षं नमः वामनेत्रे॥ ॥ततः
ब्रह्मरंध्रे सहस्रारे।सहस्रदलकर्णिकायां त्रिकोणं विभाव्य॥तिसृषु रेखासु प्रादक्षि

ॐ ॠँ नमः।१

४ ॐ ऋँ न

णेन॥ ॥ॐ अँ नमः। ॐ इँ नमः। ॐ ईँ नमः। ॐ उँ नमः। ॐ ऊँ नमः। ॐ ऋँ नमः। ॐ ॠँ नमः। ॐ ऌँ
नमः। ॡँ नमः। ॐ एँ नमः। ॐ ऐँ नमः। ॐ ओँ नमः। ॐ औँ नमः। ॐ अं नमः। ॐ अः नमः॥ ॥ॐ कँ न
मः। ॐ खँ नमः। ॐ गँ नमः। ॐ घँ नमः। ॐ ङँ नमः। ॐ चँ नमः। ॐ छँ नमः। ॐ जँ नमः। ॐ झँ नमः।
ॐ टँ नमः। ॐ ठँ नमः। ॐ डँ नमः। ॐ ढँ नमः। ॐ णँ नमः। ॐ तँ नमः॥ ॥ॐ थँ नमः। ॐ दँ नमः।
ॐ धँ नमः। ॐ नँ नमः। ॐ पँ नमः। ॐ फँ नमः। ॐ बँ नमः। ॐ भँ नमः। ॐ मँ नमः। ॐ यँ नमः। ॐ रँ
नमः। ॐ लँ नमः। ॐ वँ नमः। ॐ शँ नमः। ॐ षँ नमः। ॐ सँ नमः॥ ॥ॐ हँ। ॐ क्षँ नमः मध्ये॥
॥ ॥इति विन्यसेदित्यंतर्मातृकान्यासः॥ ॥ततः बहिर्मातृकां ध्यायेत्॥ ॥पंचाशद्व
र्णैर्विहितवदनदोःपादयुक्कुक्षिवक्षोदेशां भास्वत्कपर्दाकलितशशिकलामिं
दुकुंदावदातां॥ अक्षस्रक्कुंभचिंतामणिलिखितवरकरां त्रीक्षणां पद्मसंस्थामच्छाकल्पा
मतुच्छस्तनजघनभरां भारतीं त्वां नमामि॥ ॥इति ध्यात्वा॥ ॥अँ नमः मूर्ध्नि। ॐ आँ न
मः ललाटे। ॐ इँ नमः दक्षिणनेत्रे। ॐ ईँ नमः वामनेत्रे। ॐ उँ नमः दक्षिणकपोले। ॐ ऊँ

नमः वामकपोले॥ ॐ ऋँ नमः दक्षिणकर्णे॥ ॐ ॠँ नमः वामकर्णे॥ ॐ ऌँ नमः दक्षिणनासापु
टे॥ ॐ ॡँ नमः वामनासापुटे॥ ॐ एँ नमः उत्तरोष्टे॥ ॐ ऐँ नमः अधरोष्टे॥ ॐ ओँ नमः उत्तरदंतपं
क्तौ॥ ॐ औँ नमः अधोदंतपंक्तौ॥ ॐ अँ नमः जिह्वायां॥ ॐ अः नमः तालुस्थाने॥ ॐ कँ नमः॥ ॐ खँ न
मः॥ ॐ गँ नमः॥ ॐ गँ नमः॥ ॐ घँ नमः॥ ॐ ङँ नमः॥ दक्षिणहस्तस्यसंधौतदग्रेषुन्यसेत्॥ ॐ चँ न
मः॥ ॐ छँ नमः॥ ॐ जँ नमः॥ ॐ झँ नमः॥ ॐ ञँ नमः॥ वामहस्तस्यसंधौतदग्रेषुन्यसेत्॥ ॐ टँ नमः।
ॐ ठँ नमः। ॐ डँ नमः। ॐ ढँ नमः। ॐ णँ नमः। दक्षिणपादस्यसंध्यग्रेषुन्यसेत्॥ ॐ तँ नमः। ॐ थँ न
मः। ॐ दँ नमः। ॐ धँ नमः। ॐ नँ नमः॥ वामपादस्यसंध्यग्रेषुन्यसेत्॥ ॐ पँ नमः। ॐ फँ नमः। ॐ बँ न
मः। ॐ भँ नमः। ॐ मँ नमः। हृदिविन्यसेत्॥ ॐ यँ नमः त्वचि। ॐ रँ नमः रक्ते॥ ॐ लँ नमः मांसे। ॐ वँ
नमः मेदे। ॐ शँ नमः अस्थ्नि॥ ॐ षँ नमः मज्जायां। ॐ सँ नमः रसे॥ ॐ हं क्षँ नमः शुक्रे॥ ॥ ॥
॥इतिसमाप्तः॥ ॥छ॥ ॥अथकर्मादौद्विरपस्पृश्यप्राणायामत्रयःस्मृताः॥स्वस्त्ययनं
जपित्वानुसंकल्प्याथसमाचरेत्॥सत्यवादीपवित्राणिजपेद्व्याहृतयस्तथा। ॐ काराद्यास्त

ताजत्वासावित्रीचतदित्यृचं। आपोहिष्ठेतिसूक्तंत्र्यब्दैवत्योघमर्षणं। शंवत्यःस्वस्तिमत्य
श्चपावमान्यस्तथैवचा। सर्वत्रैतत्त्वयोक्तव्यमादावंतेचकर्मणं॥ ॥ॐकारस्यब्रह्माग्निर्गा
यत्री। भूर्विश्वामित्रोग्निर्गायत्री। भुवोजमदग्निर्वायुरुष्णिक्। स्वःभरद्वाजःसूर्योनुष्टुप्॥
महःगोतमोबृहस्पतिर्बृहती। जनोऽत्रिर्वरुणःपंक्तिः। तपोवसिष्ठइंद्रस्त्रिष्टुप्। सत्यंकश्य
पोविश्वेदेवाजगती। तत्सवितुर्विश्वामित्रःसवितागायत्री। आपोहिसिंधुद्वीपआपोगाय
त्री। पंचमीवर्द्धमानासप्तमीप्रतिष्ठाअंत्येद्वेअनुष्टुभौ। दशमीचातिरश्चिरिंद्रोनुष्टुप्। ए
तोन्विं॰ अघमर्षणोभाववृत्तोनुष्टुप्। ऋतंच॰ वसिष्ठोविश्वेदेवाःशांतिरनुष्टुप्। शंवनी॰
शंनःपंचदशवसिष्ठोविश्वेदेवाःशांतिस्त्रिष्टुप्। स्वस्तिनःसप्तस्वस्त्यात्रेयोविश्वेदेवास्तिस्रो
जगत्योनुष्टुभौत्रिष्टुभौच। स्वादिष्ठयादशमधुच्छंदाःसोमपवमानोगायत्री। अग्निमीळ
इत्यादिमंत्रैर्याःक्रियास्ताःसर्वाःप्रणवःभूर्भुवःस्वरादयःअग्निमीळेमधुच्छंदाग्निर्गाय
त्री॥ ॥अथरुद्रविधानोक्तमंत्राणामनुक्रमेणऋषिदैवतछंदोभिधानपूर्वकोविधि

निरूप्यते।चत्वारिंश्टंगासशिरस्का।गायत्री।जातवेदसेपुरश्चरणं।चत्वारिवामदेवोग्नि
त्रिष्टुप्।शिरसोब्रह्माप्रजापतिरासुरीगायत्री।कश्यपोजातवेदाग्निस्त्रिष्टुप्।जातवेद
से०एषांपुरश्चरणार्थेविनियोगः॥अबोध्यग्निःसमिधामूर्द्धानंदिवोमर्माणितेमानस्तो
कइत्यासने।अबोध्यग्निर्बुधगविष्ठिरावग्निस्त्रिष्टुप्।मूर्द्धानंभरद्वाजोग्निर्वैश्वानरस्त्रि
ष्टुप्।मर्माणितेवायुःसोमस्त्रिष्टुप्।मानस्तोकइतिकुत्सोरुद्रोजगती।एषामासनशुध्य
र्थेविनियोगः॥ ॥ततोन्यासपूर्वमंत्रादिजपहोमार्चनविधिंव्याख्यास्यामः॥ ॥ॐनमः
शिवायेतिसांगुष्ठांगुलिषुन्यसेत्।ॐसर्वज्ञधाम्नेअंगुष्ठाभ्यांनमः।ॐनंअतृप्तिधाम्नेत
र्जनी०ॐमंअनादिबोधधाम्नेमध्यमा०ॐशींअलुप्तशक्तिधाम्नेअना०ॐवांस्वतंत्रश
क्तिधाम्नेकनि०ॐयंअनंतशक्तिधाम्नेकरतल०एवंहृदयादि।ततःपादादिमूर्द्धानं १५
शरीरेसर्वतोन्यसेत्॥ठ॥पश्चाच्छंदःपुरुषमेनोनिर्णेदंशरीरेन्यसेत्।तिर्यग्बिलश्चमस
ऊर्ध्वबुध्नःछंदःपुरुषस्यचरहस्यादीनांपरमेष्ठीऋषिर्गायत्रीछंदः।उपलब्धितादेव

मत्रवर्णाः।छंदःपुरुषायनमः।शिरसि।गोतमभरद्वाजाभ्यांनमः।अक्ष्णोः।विश्वामित्रज
मदग्निभ्यांनमः।कर्णयोः।वसिष्ठकश्यपाभ्यांनमः।नासिकयोः।अत्रयेनमः।मुखे॥छ॥गाय
त्रीछंदोग्निर्देवताशिरसि।उष्णिकछंदःसवितादेवताग्रीवायां।बृहतीछंदोबृहस्पतिर्देव
ताहृदये।बृहद्रथंतरेछंदसीद्यावापृथिवीदेवतेबाह्वोः।त्रिष्टुपछंदइंद्रोदेवतानाभौ।ज
गतीछंदआदित्योदेवताकट्योः॥अतिछंदःप्रजापतिर्देवतालिंगे।यज्ञायज्ञीयंछंदोवैश्वा
नरोदेवतापायौ।अनुष्टुपछंदोविश्वेदेवादेवताऊर्वोः।पंक्तिछंदोमरुतोदेवताजांघ्वोः।द्वि
पदाछंदोविष्णुर्देवतापादयोः।विछंदोवायुर्देवताप्राणेषु।जनान्तरंछंदआपोदेवता।
जनांगे।एवंसर्वांगेविनियोजयित्वासर्ववेदमयोभवति॥छ॥ब्राह्मणःसंपद्यते।शापानु
ग्रहसमर्थोभवति।ब्राह्म्यतेजश्चवर्द्धते।नकुतश्चिद्भयंविंदतेस्वर्गलोकपरसाधनं।
धर्मार्थकाममोक्षवर्षकं।रोगदोषक्लेशव्याधिभयंनभवेत्॥ ॥इतिछंदःपुरुषविन्या
सः॥ ॥जराबोधश्शुनःशेपोरुद्रोगायत्री।जराबोधेतिशिखायां।रुद्राणांकुत्सोरुद्रोज

गती।रुद्राणामेतिशिरसि।आवोराजानंललाटे।आवोराजानंवामदेवोरुद्रस्त्रिष्टुप्॥हं
सइतिभ्रूमध्ये।हंसःशुचिषद्वामदेवःसूर्योजगती।त्र्यंबकमितिनेत्रयोः।त्र्यंबकंवसिष्ठो
रुद्रोनुष्टुप्॥तद्वुज्योतिरितितृतीयनेत्रे॥तद्वुज्योतिर्वसिष्ठोरुद्रस्त्रिष्टुप्।भद्रंकर्णेभि
रितिकर्णयोः।भद्रंकर्णेभिर्गोतमोविश्वेदेवास्त्रिष्टुप्।तमुष्टुहियःअत्रिर्विश्वेदेवारुद्रो
वात्रिष्टुप्।नासिकयोः।आरुद्रासइतिमुखे।आरुद्रासःश्यावाश्वोरुद्रोजगती।भुवनस्ये
तिकंठे।भुवनस्यपितरमितिऋजिश्वारुद्रस्त्रिष्टुप्।आनोरुद्रस्येतिबाह्वोः।आनोरुद्र
स्यऋजिश्वारुद्रस्त्रिष्टुप्।दिवोवराहमितिहस्तयोः।दिवोवराहमितिकुत्सःकपर्दीजगती।
कद्रुद्रायेतिहृदये।कद्रुद्रायकण्वोरुद्रोगायत्री।बह्वीनामितिपृष्ठे।बह्वीनामितिपायुरिषु
धिर्जगती।तमिंद्रंदातमित्युदरे।तमिंद्रंवशइंद्रोगायत्री।हिरण्यगर्भइतिनाभ्यां।हिर १५
ण्यगर्भोहिरण्यगर्भकस्त्रिष्टुप्।रुद्रस्ययेमीढुषइतिकट्यां।रुद्रस्ययेभरद्वाजोरुद्रस्त्रिष्टु
प्।इमारुद्रायतवसइतिगुह्ये।इमारुद्रायेतिकुत्सोरुद्रोजगती।मानोमहांतमितिवृषणे

द्वयोः।मानोमहांतमितिकुत्सोरुद्रोजगती।मर्माणितइत्यूर्वोः।मर्माणितेपायुःसोमोवरु
णोदेवास्त्रिष्टुप्।सोमारुद्राधारयेथामितिजान्वोः।सोमारुद्राभरद्वाजःसोमारुद्रास्त्रि
ष्टुप्।आवोराजानमितिजंघयोः।आवोराजानमितिवामदेवोरुद्रस्त्रिष्टुप्।यावोभेषजा
मितिगुल्फयोः।यावोभेषजामितिगृत्समदोरुद्रस्त्रिष्टुप्।एतावानितिपादयोः।एतावा
न्नारायणःपुरुषोनुष्टुप्।एताविश्वेतिकवचे।एताविश्वासवनेतिससंगुरिंद्रोजगती।च ८५
क्षुर्नइतिचक्षुषोः।चक्षुर्नइतिचक्षुःसूर्योगायत्री।अहंरुद्रायेत्यस्त्रे।अहंरुद्रायेतिवा
गांभृणीरुद्रस्त्रिष्टुप्।वृक्षेवृक्षइतिधनुषि।वृक्षेरवसुकइंद्रस्त्रिष्टुप्।यत्रबाणाइतिबा
णेषु।यत्रबाणाःपायुर्बाणःपंक्तिः।अदेदिष्टेतिदिग्बंधः।अदेदिष्टविश्वामित्रइंद्रस्त्रि
ष्टुप्।अगस्त्यइंद्रस्त्रिष्टुप्।नदस्यमारुधत।मुद्रा॥७॥ततोदशाक्षरमंत्रंशरीरेन्यसेत्।
ॐनमोभगवतेरुद्रायेतिप्रजापतिरुद्रोविराट्॥ॐकारंमूर्ध्निविन्यस्यनकारंनासिकां
तरे।मोकारंतुललाटेवैभकारंमुखमध्यतः।गकारंकंठदेशेतुवकारंहृदयेन्यसेत्।

तेकारंदक्षिणेहस्तेरुकारंवामतोन्यसेत्।द्राकारंनाभिदेशेतुयकारंपादयोर्न्यसेत्॥७॥
मस्तकेविन्यसेद्रुद्रंललाटेचंद्रशेखरं।नेत्रेत्रिलोचनंदेवंभैरवंश्रोत्रयोर्न्यसेत्।घ्राणेतु
शंकरंदेवंमुखेपशुपतिंतथा।नीलकंठंकंठदेशेहृदयेव्यापकंन्यसेत्।करेगंगाधरंदेवं
शिवंनाभ्यांतुविन्यसेत्।वामदेवंतथागुह्येऊर्वोश्चत्र्यंबकंन्यसेत्।सर्वज्ञंजंघयोर्न्यस्य
पादयोश्चकपर्दिनं॥पुनःललाटेतुशिवंविंद्यातुकंठेरुद्रंसमाश्रितं।नाभिमंडलमीशा
नंजान्वोश्शंकरंतथा।पादयोश्चतथानंतंशिवंसर्वत्रचिंतयेत्।आत्मानंरुद्ररूपंसंभा
व्य॥रुद्रंतुपादयोर्न्यस्यकूर्ममूर्वोश्चविन्यसेत्।नीलकंठंकंठदेशेललाटेशशिभूषणं।
शिवंशिरसिविन्यस्यशिखायांचसदाशिवं॥पुनः।न्यसेच्चतुर्दशांगेषुनामान्यस्यचतु
र्दश।योजितेह्यंगमंगेषुरुद्रत्वंल्योत्नवेन्नरः॥८॥पादयोःकालाग्निरुद्रायनमः।जंघ १६
योर्भवोद्भवायनमः।जान्वोर्हर्षारूपायनमः।कट्योस्त्रिमूर्तये०।नाभौश्रीप्रदायन०।हृ
दिमहादेवायन०।कंठेनीलकंठायन०।मुखेश्रीमुखायन०।घ्राणयोःप्राणेशायन०।कर्ण

याम्बरायन०नेत्रयोस्त्रिनेत्रायन०ललाटेचंद्रशेखरायन०शीर्षेनमःशिवाय०शिखा
यांसदाशिवायन०॥७॥महादेवंन्यसेतूर्ध्वोरूर्ध्वेचैवमहेश्वरं॥आदिदेवंककुयस्यपृष्ठे
विश्वेश्वरंन्यसे॥स्कंधेवृषध्वजंदेवंबाह्वोश्चकृत्तिवाससं॥सद्यंत्र पादयोर्न्यस्यवामनंचोरु
मध्यतः॥७॥पञ्चांशंकरायन०जान्वोर्विश्वरूपिणेन०ऊर्वोःकामदहनायनमः॥गुह्येत्रि
नेत्राय०मुखेविश्वमूर्त्तयेन०नासिकायांरुद्रायन०ललाटेकपर्द्दिनेनमः॥नेत्रेत्रिन
यनाय०शिरसिशिवात्मनेन०सर्वांगेन्नवायन०॥७॥सद्यंत्रपादयोर्न्यस्यवामनंचोरु
मध्यतः॥अघोरंहृदयेन्यस्यतत्पुरुषंमुखेन्यसेत्॥ईशानंमूर्द्ध्निविन्यस्यहंसोंगानिचवि
दधत्॥हंसहंसेतियोब्रूयाद्धंसोनामसदाशिवः॥शंकरेणकृतारक्षासर्वकामप्रदायिनी॥
एवंन्यासविधिंकृत्वादिक्पालानुपरितोन्यसेत्॥गणाधिपतयेनमः॥स्वामिकुमारायनमः॥
भृंगिरिटेन०स्कंदायन०चंडीश्वरायन०वृषभध्वजायन०महाकालायन०ऋषिदेवता
यन०॥७॥भरतःश्चिंतनीयाः॥प्राच्यामिंद्रं॥त्रातारंगर्गेइंद्रस्त्रिष्टुप्॥आग्नेय्याममग्निं॥त

न्नोअग्नेसमनये।हिरण्यस्तूपोग्निस्त्रिष्टुप्।दक्षिणस्यांयमं।यस्मिन्वृक्षे।कुमारोयमोनुष्टु
प्।निर्ऋतेनिर्ऋतिं॥मोषुणपराकण्वोनिर्ऋतिर्गायत्री।प्रतीच्यांवरुणं।उदुत्तमंवरुणशु
नःशेपोवरुणस्त्रिष्टुप्।वायव्यांवायुं।आनोनियुद्भिःपरुच्छेपोवायुरत्यष्टिः।वयंसोमव्र
तेबंधुःसुबंधुःश्रुतबंधुर्विप्रबंधुःसोमोगायत्री।ईशान्यांईशानं।तमीशानंगोतमोवि
श्वेदेवाजगती।ऊर्ध्वंरुद्रं॥अस्मेरुद्राःप्रगाथोरुद्रास्त्रिष्टुप्।पृथिव्यांपृथिवीं।स्योनामे
धातिथिःपृथिवीगायत्री॥एतत्संपुटंजपकालेहोमकालेवापरितोन्यसेत्॥एवमात्म
निरोद्धीकरणंकृत्वात्वक्चर्मास्थिभिःपापैःप्रमुच्यते॥सघोरोरोगैःमुच्यते।सर्वभूतेष्वपरा
जितोभवति।यक्षरक्षःपिशाचभूतप्रेतजृंभकंयमदूतशाकिनीसर्पश्वापदतस्कराद्यु
पद्रवाःसर्वेज्वलंतंपश्यंति।येनेदमित्याद्यंगन्यासः॥ॐ॥हृदयंशिवसंकल्पंशिरःस्तु १७
कंतत्पोरुषं॥अहंरुद्रेभिरस्त्रंचनतमंहःशिखातथा॥आशुःशिशानःकवचंविभ्राड्
बृहच्चनेत्रकं।एवंषडंगानंतरंध्याये।अथात्मानंरुद्ररूपंध्यायेत्।पंचवक्त्रंदशभु

जंत्रिनेत्रंसोम्यंविरूपाक्षंभस्मोद्धूलितमात्रंनीलग्रीवंशशांकचिह्नंशुद्धस्फटिकसंका
शंनामयज्ञोपवीतिमं।रुधिरार्द्रगजचर्मपरीधानंव्याघ्रचर्मोत्तरीयकं।कमंडलुअक्ष
सूत्रहस्तंअभयहस्तंपरशुहस्तंडमरुहस्तंपिनाकपाणिंभैरवंक्षेत्रपालश्मशानवासि
नंअहिर्बुध्न्यवृषाकपिशचीनावदातव्याद्योतितदंतपंक्तिप्रकगितमुक्तैकंदुनासाध्वंसित
तमसंपूर्ववदनंउदितसूर्यकांतिसिंदूरारुणनिह्निमालक्तकेंद्रगोपजपाकुसुमाका
रविराजितोत्तरवदनं।कोपाक्रांतसजलघननीलांजनजैचयोपमकल्पांतकालीन
ज्वलनशिखामर्शितधूम्रनिचयनिभदक्षिणवदनं।गारूडोयममणिमाणिक्यहेमजू
टाशरीरैषप्रुष्पोमधी— कावपश्चिमास्यं।ऊर्द्ध्ववक्त्रं।कोटिप्रतापक्षतिकरवेदादिविद्या
ज्ञानकलाकल्पस्वरूपंपंचवदनंपार्वत्यर्द्धांगदेहंहेरंबस्वामिकुमारतनययुक्तंनंदि
चंगिवीरभद्रदंडपाणिकालभैरवप्रमुखैर्गणैःसेवितपादपीठंघृताचीमेनकारंभोर्व
शीतिलोत्तमाद्यैरप्सरोगणैर्नर्तितगृहांगणंनारदतुंबरचित्रविचित्रविश्वावसुदा

हाहूहूप्रमुखगंधर्वगणैर्गीयमानंगुणग्रामंनारदपर्वतअसितदेवलगर्गलवगोत
मभरद्वाजवसिष्ठकश्यपाद्यैर्ऋषिभिर्ध्यायमानंनीलकंठरुचिंवक्रितत्रिनेत्रंचंद्रक
लधारिणंजटाजूटलग्नोपितगांगजलविद्योतितशिरसंअहिलतमेखलंअदित्तक
नकांगदंश्मशानभस्मोद्धूलितांगरागंशुद्धस्फटिकसंकाशंतेजस्वरूपंमुखनिःश्वासो
श्वासःमोदसारंगगुंजारचितविमिश्रितकांतिरुचिरंगानिप्रियंसकलभक्तवांछितार्थ
प्रदंसकलसिद्धदायकंब्रह्मादिविष्णुवासवांतैस्त्रयस्त्रिंशत्कोटिसुरगणैर्दशभि
र्देवयोनिभिःसेवितपादपीठंवृषस्कंधसमारूढंउमादेहार्द्धधारिणंडुर्दंतकपिल
जटिदिशासुद्योतकारिणंअमृतेनाप्लुतंहृष्टंदिव्यभोगसमाकुलंदिक्देवतासमा
युक्तंसुरासुरनमस्कृतंनित्यंचशाश्वतंशुद्धंध्रुवमक्षरमव्ययंसर्वव्यापिनमव्यक्तंरु २८
द्रंवैविश्वरूपिणंएवंविधंश्रीमहादेवंध्यात्वासर्वान्कामान्साधयेत्यान्यर्थानुद्दिश्य
कुरुतेसर्वेअर्थाःसफलाभवंति।मित्रत्वंयांति।शत्रवःपराभवंयांति।हेतवेजग

तामेवसंसारार्णवसितवे।प्रणवेसर्वविद्यानांशंभवेगुरवेनमः।नमस्यंमूर्द्धदिग्बाहो
न्नूपादगगनोदरं।चंद्रसूर्याग्निनेत्रास्यविश्वरूपजगत्पते।शिवतत्वंनजानामिकीदृ
शोसिमहेश्वर।यादृशोसिमहादेवतादृशायनमोनमः॥एवंध्यात्वाद्विजःसम्यकप्र
जायजनमारभेत्॥सुगुप्तेशुभ्रएयदेशोगोचर्ममात्रेस्थंडिलपद्मेकलशोपरिलिंगंप्र
कल्प्यपीठदेवताःसंस्थाप्याष्टदलोपरिप्रथमंपीठपूजनं॥७॥ततःपीठात्मनोर्मध्येऽ
र्घपात्रपूरणं।तत्रधेनुमुद्रांप्रदर्श्यास्त्रेणशोधयेत्।रुद्रगायत्र्यापूरयेत्।तेनोदके
नात्मानमुपहारांश्चप्रोक्षयेत्॥७॥आसनेआधारशक्तिकमलासनायनमः।मूर्द्धि
ड्डेआत्ममूर्त्तयेनमः।इतिआत्मानंसंपूज्यहस्तौप्रक्षाल्यपीठंपूजयेत्॥आग्नेयादि
कोणेषु।गंगणपतयेनमः।क्षंक्षेत्रपालायन॰।दुंदुर्गायै॰संसरस्वत्यैन॰पश्चिमे
त्रिः।गुरुभ्योनमः।परमगुरुभ्यो॰परमेष्ठीगुरु॰द्वारदक्षिणशाखायां।गंगायै॰।वाम
शाखायां।यमुनायै॰देहल्यै॰द्वारश्रियै॰वास्तुपुरुषायपंचचत्वारिंशद्देवतास

हितायनमः। उत्तरांगे॥ पंपत्रेभ्यो॰ केसरेभ्यो॰ कर्णिकायै॰ मूलेकालाग्निरुद्राय
नमः। मंडूकायनम॰ आधारशक्त्यैन॰ मूलप्रकृत्यैन॰। कूर्मायन॰ महावराहायन॰।
अनंतायन॰ भूम्यै॰ कैलाशाय॰ कल्पवृक्षाय॰ रत्नमंडपायन॰ रत्नसिंहासना
यन॰ कंदादिसहितकमलासनाय॰ तदुपरिचतुरस्रपीठे। आग्नेयादिकोणेषु।
धर्मायनमः। ज्ञानाय॰ अवैराग्यायनमः। अनैश्वर्यायनमः॥ पद्ममध्ये॥ सत्वायश्वेत
रूपायनमः॥ रजसेरक्तवर्णायनमः। तमसेकृष्णवर्णायनमः। अकाराब्रह्मरूपाय
नमः। उकारायविष्णुरूपायनमः। मकारायरुद्ररूपायनमः। अग्निमंडलात्मकाय
नमः॥ अर्कमंडलायद्वादशकलात्मकायनमः। संसोममंडलायषोडशकलात्मका
यनमः॥ अथपूर्वादिदिक्षु॥ मंमायातत्वायनमः। कलातत्वायनमः॥ विद्यातत्वाय १९
नमः॥ शिवतत्वायन॰ अंआत्मनेनमः। अंतरात्मनेनमः। जीवात्मनेनमः। परमा
त्मनेनमः॥ ४॥ अथाष्टदिक्षु॥ रुद्रायनमः। शर्वायनमः। पशुपतयेनमः। उग्रायन॰

भवायनः नमाद्यादेवायनः ईशानायनः तत्पूर्वे वामायैनः॥१॥

अशनयेनमः।ॐज्येष्ठायेनमः।रौद्र्यैनमः।काल्यैनमः।कलविकरण्यैनमः।बलप्रमथि
न्यैनमः।सर्वभूतदमन्यैनमः।मध्येमनोन्मनायैनमः।ॐनमोभगवतेसकलगुणात्म
शक्तियुक्तायअनंतायोगपीठात्मनेनमः॥इतिपीठंसंपूज्य॥ ॥तत्रधेनुमुद्रांप्र
दर्श्यावाहनाद्यर्चयेत्।तत्रादौहेरंबस्कंदौ॥खच्छमध्येज्योतीरूपंध्यात्वाततःपुष्पां
जलिंदत्वापीठेपरिस्थापयेत्॥ ॥अथशोडशोपचाराः॥ ॥चत्वारिशृंगेत्यावाह
नं॥चत्वारिशृंगेतिवामदेवोरुद्रस्त्रिष्टुप्।आत्वावहंतुहरयःसचेतसःश्वेतैरश्वैः
केतुमद्भिर्वाताजिरैर्बलवद्भिर्मनोजवैरायाहिशीघ्रंममहव्यायशर्वौंदिवानांत्र
ऋषीणांचमनुष्याणांचसर्वशःसहस्राक्षंविरूपाक्षंशिवमावाहयाम्यहं॥ ॥सदा
नंदमयंरुद्रंसूर्यमंडलसंस्थितं।अंशेनात्रसमावाह्यपूजयेदंगशःशिवं॥प्रजा
पतितन्रूपंतंसहस्राक्षंशतेषुधिं।मन्यंतंशतशीर्षाणंरुद्रमावाहयाम्यहं॥ ॥
आगच्छभगवन्देवस्थानेचात्रस्थिरोभवायावत्पूजासमाप्येततावत्त्वंसन्निधौ

न्नव॥आराधितोमनुष्यैस्त्वंसिद्धैर्देवैःसुरादिभिः।आवाहयामिभक्त्यात्वंपूजांगृ
ह्णमहेश्वर।आयाहिसंवर्त्तोरुद्रोद्विपदा॥ॐआयाहिवनसासहं॰नुभिः॥अथदशा
क्षरमंत्रंन्यसेद्देवस्यमस्तकेअथवा॥हनीश्स्थापिनी२स्थिरीकरणी३संमुखीकरणी४
संनिरोधिनी५अवगुंठिनी६षडंगानांषट्७अमृतीकरणी८परमीकरणी९आवाह
नादिचतुर्दशमुद्रांप्रदर्श्ये॥मानस्तोकइतिकुत्सोरुद्रोजगती।मानस्तोकइत्यास
नं॥वसिष्ठोनद्योजगती।याःप्रवतइतिपाद्यं॥ ॥विश्वकर्माविश्वकर्मात्रिष्टुप्॥विश्व
तश्चक्षुरित्यर्घ्यं॥सिंधुद्वीपआपोगायत्री।आपोहिष्ठेत्याचमनं॥ ॥अथपंचामृत
स्नपनं॥ ॥गोतमःसोमोगायत्री।आप्यायस्वेतिपयसास्नानं।वामदेवोदधिक्रा
वणो।न्नुष्टुप्।दधिक्राव्णइतिदधिस्नानं॥भरद्वाजोद्यावापृथिव्योजगती।घृतव २०
तीतिघृतेनस्नानं॥वामदेवःक्षेत्रपतिस्त्रिष्टुप्।मधुमतीरितिमधुनास्नानं।उप
मन्युःसोमपवमानस्त्रिष्टुप्।रसाय्यइतिशर्करयास्नानं॥ ॥इमंमेगंगेइतिच॥

इमारुद्रायतवसइतिमानोमहांतमितिचकलशैःस्नानं॥तयोःकुत्सोरुद्रोजगती॥त
तोन्नूपइत्यादिनिगद्देनकद्रुद्रायेत्यादिसूक्तैश्चत्र्यंबकांतैर्जलनिषेकः॥पूर्ववदाचम
नं॥ ॥रुद्रगायत्र्यामौक्तपवेशनं।अस्याऋगद्बीजपुरुषःसूर्योगायत्री॥तत्पुरुषा
यविद्महेइत्यादीर्घतमामित्रावरुणौत्रिष्टुप्॥युवंवस्त्राणीतिवाससीपरिधानं।
शुनःशेपोरुद्रोगायत्री।जरांबोधइतिकौपिनं॥तथाचमनं॥मानस्तोकइति॥दी
र्घतमाअश्वस्त्रिष्टुप्।उपप्रागात्सुमदित्युपवीतं।विश्वामित्रोसूर्यस्त्रिष्टुप्।युवासु
वासाइत्युत्तरीयं।कपिञ्जलटिंदिवोवराहमितिकपर्द्दबंधनं।भूतिःकेश्यनुष्टुप्।केश्य
ग्निमितिश्मश्रुसंस्कारः।शुनश्शेपइंद्रोगायत्री।योगेयोगइतियोगपट्टः।कुत्सोरुद्रो
जगती।दिवोवराहमितिमेखला॥शुनश्शेपइंद्रोगायत्री।स्तोत्रंराधानमितिविभूतिः।
वत्रिरग्निर्विराड्रूपा।कीलंनोरश्मअश्वान्नरइतिभस्मोद्धूलनं।गोतमोमरुतस्त्रिष्टुप्।
प्रयद्वइत्थेष्वितिगजचर्म।कुत्सःसुन्नवोजगतीनिश्चर्मणइतिव्याघ्रचर्म।नरह्वौजोग्नि

वैश्वानरो जगती। व्यस्तश्चाद्रोदसीइति त्वष्टाजिनं। मन्युर्मन्युस्त्रिष्टुप्। त्वयामन्यु वि
त्यायुधानि। वसिष्ठो रुद्रो जगती। इमा रुद्राय स्थिरधन्वन इति वृषणं। पायुर्धनुस्त्रिष्टु
प्। धन्वेति धनुः। पायुर्ज्या त्रिष्टुप्। वक्ष्यन्तीवेति ज्यारोपणं। पायुरिषुधिर्जगती। बह्वीनां
पितेति इषुधिः। पायुर्बाणाः पंक्तिः। यत्र बाणा इति बाणार्पणः। पायुरात्री त्रिष्टुप्। ते आचरं
ती इति इषुप्रयोगः। देवजामय इंद्रो गायत्री। त्वमिंद्र सजोषसमिति वज्रं। कक्षीवान्
विश्वेदेवास्त्रिष्टुप् शं हिरण्यकर्णमित्याभरणं। गर्ग इंद्रस्त्रिष्टुप्। रूपं रूपमित्यादर्शः।
ब्रह्मातिथिरश्विनो गायत्री। हिरण्ययीति रथांगानि। वसिष्ठः सर्पा अनुष्टुप्। कालिक इ
ति सर्पाभरणं। दीर्घतमाः कालचक्रं त्रिष्टुप्। सप्त युंजंतीति चक्रं। कूर्मा आदित्यास्त्रि
ष्टुप्। यावो माया इति पाशाः। उपसर्गो दुंदुभिस्त्रिष्टुप्। उपश्वासयेति दुंदुभिः। विश्वामि
त्र इंद्रस्त्रिष्टुप्। संघोष इति घोषः। इंद्राणी इंद्रः पंक्तिः। वृषभो न तिग्म इति वृषभः। त्रि
तश्चंद्रमाः पंक्तिः। चंद्रमा अप्स्विति चंद्रकला। स्यूमरश्मिर्मरुतो जगती। ग्रावाणो ने

तिशूलं।अप्रतिरथइंद्रस्त्रिष्टुप्।।एवशकेरितिरथः।पायुर्हस्तघ्नस्त्रिष्टुप्।अहिरिवेत्य
हिहारः।विश्वामित्रोयूपस्त्रिष्टुप्।स्टंगाणीवेतिस्टंगं।पायुःसोमोवरुणोदेवास्त्रिष्टुप्।म
र्माणितइतिवर्म।जरत्कर्णोग्राक्षोजगती।तुरंजनइतिशंखघोषः।स्तयइंद्रोजगती।
एषप्रहूवीरितिचामरः।जमदग्निरापोनुष्टुप्।आपइतिदित्यभिषेकः।गृत्समदःशाकं
नकस्त्रिष्टुप्।कनिक्रदितिमांगल्यं।सुपर्णइंद्रोगायत्री।अयंहितइतिवर्द्धापनं।कक्षी
वानुषास्त्रिष्टुप्।गृहंगृहमितिगृहं।श्यावाश्वोमरुतोजगती।व्य१न्तकृन्द्राइतिदुर्गः।कूर्म
धा तोऽग्निर्द्यावापृथिव्योगायत्री।।गावउपावतेतिकुंडलं।हरिंबिभिरिंद्रोगायत्री।दीर्घस्ते
अस्त्वंकुवराइत्यंकुवराः।प्रजापतिर्द्यावापृथिव्योत्रिष्टुप्।नानाचक्रातेइतिनानालंका
रः।नरक्षाजइंद्रस्त्रिष्टुप्।श्रीयेतेपादाइतिपादुके।सिंधुक्षित्प्रियोजगती।इमंमेगंगइ
तिगंगासंयोगः।अनयोःप्रतिक्षत्रोदेवपत्न्योजगती।देवानांपत्नीरितिद्वाभ्यांदेवप
त्नीसंयोगः।दीर्घतमागौरीर्जगती।गौरीर्मिमायेतिगोर्यद्धांगकरणं।गृत्समदोगण

पतिर्जगती।गणानांत्वेतिगणपतिसंयोगः।वामदेवःकुमारोगायत्री।बोधद्यन्मेतिस्वामि
कुमारसंयोगः।श्यावाश्वोमरुतोगायत्री।परावीरासइतिवीरयोगः।वामदेवःक्षेत्रपतिर
नुष्टुप्।क्षेत्रस्यपतिनेतिक्षेत्रपालयोगः।विश्वकर्माविश्वकर्मात्रिष्टुप्।तत्रायजंतइवि
णमितिव्रतसंयोगः।दीर्घतमाअग्निस्त्रिष्टुप्।नयंरिपवइतिप्रेतसंयोगः।गर्गोग्निःसतो
बृहती।नहिनेअग्नइतिजंनकसंयोगः।प्रस्कण्वइंद्रःसतोबृहती।उग्रंनवीरमितिवी
रभद्रयोगः।हिरण्यस्तूपइंद्रस्त्रिष्टुप्।उपेदहमितिधनदाकानं।कश्यपइंद्रःपंक्तिःय
त्रानंदाश्चेतिनंदीसंयोगः।कुशिकोदुर्गोअनुष्टुप्।हीरणस्तपितादुर्गाचंदनेनेतिदु
र्गायोगः।कश्यपोजातवेदाग्निस्त्रिष्टुप्।जातवेदसइतिचामुंडाकनं।संकुसुकोमृत्यु
स्त्रिष्टुप्।परंमृत्योइतिपरिवारमेलनं।कुशिकोरात्रिरनुष्टुप्।सर्ववृतपित्राचेन्यइति २२
चा।निषगोषधयोनुष्टुप्।यश्चक्रतमित्योषध्याकानं।विश्वामित्रोविश्वेदेवाअनुष्टुप्।त्रा
यंतामितिनमस्कारः।अत्रिरुद्रस्त्रिष्टुप्।तमुष्टुहीयेनुलेपनं।वसिष्ठोरुद्रोनुष्टुप्॥

त्र्यंबकमितितंडुलान्॥ ॥अथपंचवक्त्रपूजनं॥पंचवक्त्रोवृषारूढः प्रतिवक्त्रंत्रिलोचनः।
कपालशूलखट्वांगीचंद्रमौलीसदाशिवः।एवंविधायपंचवक्त्रायनमः।सद्योजातेतिमं
त्रस्यसद्योजातऋषिः।ब्रह्मादेवता।गायत्रीछंदः।पश्चिमास्यपूजने०सद्योजातंप्रपद्या
मि०नमः।श्वेतवर्णंहंसवाहनपश्चिमवक्त्रपृथिवीतत्वसृष्टिरूपात्मनेब्रह्मणेनमः॥
ब्रह्मजज्ञानं०विवः।जमदग्निर्देवा।त्रिष्टुप्।सद्योजातोव्य०देवाः।क्रौंइषुमुद्राप्रद
र्शिनी।मध्यमातर्जनीयुक्ताबाणमुद्राप्रकीर्तिता।ऋध्यैनमः।सिध्यै०धृत्यै०लक्ष्म्यै०मे
धायै०कांत्यै०स्वधायै०प्रज्ञायै०सद्योजातस्यतद्रूपाःकलाअष्टौस्मरेद्वशी।एतदष्टक
लासहितंसद्योनिधंपश्चिमशिववक्त्रंपूजयामि।श्वेताक्षतैःश्वेतपुष्पैःपूजयेद्धंसवाह
नं।सिध्यंतिसर्वकार्याणिप्रापतेचनसंशयः॥ ॥अथस्तुतिः॥ ॥प्रालेयामलबिंदुकुं
दधवलंगोक्षीरफेनप्रभंभस्माभ्यंगमनंगदेहदहनज्वालावलीलोचनं।ब्रह्मेंद्रादि
मरुद्गणैःस्तुतिपरैरभ्यर्चितंयोगिनिर्वंदेहंसकलंकरंकरहितंस्थाणोर्मुखंपश्चिमं।

पश्चिमवक्त्रायनमः।वक्त्रानुचरेभ्यो०वामदेवायेतिवामदेवऋषिःविष्णुर्देवताधृतिश्छंदः
उत्तरवक्त्रस्यपूजनेविनियोगः।ॐवामदेवायनमो०नमःस्वर्णवर्णगरुडवाहनउत्तरव
क्त्रायपरस्तत्वत्रमूर्त्तरूपात्मनेविष्णवेनमः।मेधातिथिर्विष्णुर्गायत्री।तद्विष्णोःपरमं०त
तांभरद्वाजोरुद्रस्त्रिष्टुप्।वाममद्यसवितर्नूस्याम।ह्रींपद्ममुद्रादर्शनं।हस्ताभ्यांसंज
लिंग्यत्वामध्येगुष्ठद्वयंपुनः।विधायकर्णिकाकारंपद्ममुद्राप्रकीर्त्तिता।अंगुष्ठनामि
कायोगाद्वामदेवकलान्यसेत्।रजसेनमः।रक्षायै०रत्यै०पाल्यायै०कामायै०संजी
विन्यै०प्रियायै०बुध्यै०क्रियायै०धात्र्यै०भ्रामिन्यै०मोहिन्यै०ह्लारायै०वामदेवस्यतद्रू
पास्त्रयोदशकलाह्वमाः।एतत्त्रयोदशकलासहितंवामाभिधंतदुत्तरशिववक्त्रंपूजय।
मि।जलस्याशातपत्रैश्वगरुडारूढमर्चयेत्।रिष्टदोषविनाशायप्राप्तयेश्रेयसंपदां २३
॥अथस्तुतिः॥ ॥गौरंकुंकुमपिंजरंसुतिलकंव्यापांडुगंडस्थलंभ्रूविक्षेपकटाक्ष
वीक्षणलसत्संसिक्तकर्णोत्पलं।स्निग्धंबिंबफलाधरंप्रहसितंनीलालकालंकृतंवंदे

५८

पूर्णशशांककमंडलनिभंवक्त्रंदूरस्योत्तरं।ॐतत्त्वरव॰नमः।वक्त्रानु॰च॰।अघोरेत्यघोरऋ
षिःरुद्रोदेवताअनुष्टुपूछंदः।दक्षिणास्यपू॰।अघोरेभ्योथ॰भ्यः।इंद्रनीलवर्णकूर्मवाह
नदक्षिणवक्त्रतेजस्तलविश्वरूपात्मनेकालाग्निरुद्रायनमः।इमारुद्रायत॰ॐहूं।
विश्वरूपमुद्रा।ऊर्द्ध्वतर्जन्याद्यंगुलित्रयं।अंगुष्ठमध्यमायोगान्यसेत्तत्रकलाष्टकं।त
मसे॰मोहायै॰अक्षयायै॰निद्रायै॰व्याधये॰मृत्यवे॰क्षुधायै॰तृषायै॰।अघोरस्य
कलाह्येताअष्टौचपरिकीर्त्तिता।एतदष्टकलासहितंअघोराग्निधंदक्षिणशिवव
क्त्रंपूजयामि।नीलोत्पलैःकणवीरैःपूजयेत्कूर्मसंस्थितं।सर्वबाधाविनाशायज्ञान
मोक्षप्रसाधकं॥स्तुतिः॥कालाभ्रभ्रमरांजनाचलनिभंव्यावृत्तिपिंगेक्षणंखंडेंदुद्यु
यनिःसृतंसुदशानप्रोद्भिन्नदंष्ट्रांकुरं।सर्पप्रोतकपालशुक्तिशकलव्याकीर्णवक्षे
खरंवंदेदक्षिणमीश्वरस्यवदनंचूनंगरोद्भंमुखं।दक्षिणवक्त्राय॰वक्त्रानु॰।तत्पु
रुषेतितत्पुरुषऋषिः।सूर्योदेवतागायत्रीछंदः।प्रागास्यपूज॰।ॐतत्पुरुषाय॰।

तू।रक्तवर्णंअश्ववाहनपूर्ववक्त्रवायुस्तत्वचैतन्यात्मने।आदित्यायनमः।वामदेवःस्त्र
यीजगती।हंसः॥विषं॰ऋतं॥ ॐ कैं व्यापकमुद्रा।अंगुष्ठतर्जनीयोगान्यसेतू।कलाचत्र
ष्टयैं।शांत्यै॰विद्यायै॰प्रतिष्ठायै॰निवृत्त्यै॰एतच्चतुष्कलासहितंतत्पुरुषाभिधंपूर्ववदि
कूस्थंशिववक्त्रंपूजयामि।दूर्वांकुरर्कपुष्पैश्चपूजयेदश्ववाहनं।आयुष्यंवर्द्धातत
स्यचत्वर्णांफलदायकं॥स्तुतिः॥संवर्त्ताग्नितडित्प्रतप्तकनकंसंसिद्धतेजोरुणंगंभी
रस्मितनिःसृतंसुदशनप्रोद्भासिताम्राधरं।बालेंदुद्युतिलोलपिंगलजटाभारप्र
बद्धोरगंवंदेसिद्धसुरासुरैःप्रणमितंपूर्वंमुखंशूलिनः।बालार्कवर्णमारक्तंतत्पुरु
षंतडित्प्रभं।दिव्यंपिंगजटाधरंवंदेहंपूर्णवदिङ्मुखं।पूर्ववक्त्रायनमः।वक्त्रानु॰
ईशानइतिईशानऋषिःशिवोबृहती।ऊर्द्धवक्त्रपूजने॰।ईशानंसर्ववि॰शिवं।पीतव
र्णंवृषनवाहनऊर्द्धवक्त्रआकाशतत्वअव्यक्तायसर्वव्यापकात्मनेनमः। ॐ क्रौं ज्ञा
नमुद्रा।गोतमोविश्वेदेवाजगती।तमीशानं॰ये।शिशिन्यै॰दयायै॰दृष्टायै॰मरीच्यै॰

ज्ञानिन्यै॰ पंचेशानकलाएताईशारूपधराःस्मरेत्।एतत्पंचकलासहितंईशानानि
धंऊर्द्ध्वंशिववक्त्रंपूजयामि।यक्षकर्द्दमसंमिश्रैर्धत्तूरैर्बिल्वपत्रकैः॥अन्यैर्स्तद्रव्यैःपु
ष्पैरर्चयेद्वृषवाहनं॥स्तुतिः॥व्यक्ताव्यक्तगुणेतरंसुवदनंषट्त्रिंशतत्वाधिकंतस्मादु
र्द्ध्वजवक्त्रमव्ययमितिध्येयंसदायोगिभिः।वंदेतामसवर्जितंमनसासूक्ष्मादिसू
क्ष्मंपरंशांतंपंचममीश्वरस्यवदनंखंव्यापितेजोमयं।ईशानंसूक्ष्ममव्यक्तंतेजःपुंजंप
रावरं।अमृतस्नाविचिद्रूपंवंदेहंपंचमंमुखं।पश्चिमे।ततस्तेषांपंचशक्तीःपूजयेत्।
पार्वत्यैनमः।पश्चिमेगौर्यै॰उत्तरेकालिंद्यै॰दक्षिणेकोटर्यै॰पूर्वेविश्वधारिण्यैनमः
मध्येसुभगायैविद्महेकाममालिन्यैधीमहि।तन्नोगौरीप्रचोदयात्।गौरीर्मिमाय॰।अ
थचंदनाक्षतैरुद्रांगपूजनं॥अथएकादशरुद्रांस्ताकेडस्यांगेषुपूजयेत्।तथाश
क्तीश्वशक्त्यंगेपादतोमस्तकावधि।याम्येपादेत्वघोरायपशुपतयउत्तरे।शर्वायविश्व
रूपायदक्षिणोरुजानुनोः।कट्योरूक्षविश्वरूपायत्र्यंबकायनमोनमः।कपर्द्दिनेक

रेयाम्येसौम्यश्रीनैरवीयचशूलपाणये।आद्येसेईशानायद्वितीयकें।महेशायनमो
मूर्ध्नितद्वच्छक्तिंसमर्चयेत्।ॐनमोभगवत्यैप्राक्उमादेव्यैचपादयोः।श्रीशंकरप्रिया
यैचपार्वत्यैजान्वुनोर्द्वयो।गौर्य्यैकाल्यैनमःकट्योर्दक्षिणोत्तरयोः।क्रमात्कालिंद्यैद
क्षिणपाणौकोटर्य्यैनमउत्तरेविश्वंभर्य्यैनमस्तुलागंगायैसनमोसयोः।शिवशक्त्यैन
मोमूर्ध्निअथावरणदेवताः।चतुर्थ्यंतैर्नमोंतैस्वनाममंत्रैःप्रपूजयेत्।ततःपीठस्थापि
तदेवताःपूजयित्वा।।अस्थापिताचरणानिपूजयेत्पूर्वादि।अनंतायनमः।सूक्ष्मा
यनमः।शिवोत्तमाय०एकनेत्राय०एकरुद्राय०त्रिमूर्त्तये०श्रीकंठाय०शिखंडिने०इ
तिप्रथमावरणं।ब्रह्माण्यै०माहेश्वर्य्यै०कौमार्य्यै०वैष्णव्यै०इंद्राण्यै०चामुंडायै०वारा
ह्यै०महालक्ष्म्यै०इतिद्वितीयावरणं।।ततउत्तरादि।उमायै०चंडेश्वराय०नंदिने० २५
महालक्ष्म्यै०इतिद्वितीकालाय०गणेशाय०वृषभाय०भृंगिरीटाय०स्कंदाय०।इ
तितृतीयावरणं।आदित्यायनमःसोमायेत्यादिचतुर्थविविरणं।ब्राह्म्यस्वराय०वै

ल्मवज्वराय॰रौद्रज्वराय॰अधिभ्योनमः।व्याधिभ्यो॰क्षुधायै॰तृषायै॰मृत्यवेमध्येऽष
धीभ्योनमः।इतिपंचमं।अष्टोत्तरशतभैरवेभ्यो॰द्वापंचाशद्वीरेभ्यो॰चतुराशीतिचेरि
काभ्योनमः।षट्पंचाशत्कोटिचामुंडाभ्यो॰नवकोटिकात्यायनीभ्यो॰नवदुर्गाभ्यो॰
नवनागेभ्यो॰येदेवासःपुरुढेपोविश्वेदेवास्त्रिष्टुप्।येदेवासोदिव्ये॰ध्वं।त्रयस्त्रिंशत्को
टिदेवेभ्योनमः।शुनश्शेपोदेवास्त्रिष्टुप्।नमोमहद्भ्योनमो॰देवाः।इतिषष्टावरणं।
इंद्रायऐरावणारूढायसुरेशायनमः।अग्नयेमेषारूढायतेजोधिपतये॰यमायमहि
षारूढायपितृधीशाय॰निर्ऋतयेनरारूढायरक्षोधीशाय॰वरुणायमकरारूढाय
जलेशाय॰वायवेमृगारूढायप्राणेशाय॰सोमायदशाश्ववाहनायनक्षत्रेशाय॰
ईशानायवृषारूढायविद्येशाय॰ब्रह्मणेहंसारूढायलोकनाथाय॰हरयेगरुडारू
ढायभूतनाथाय॰॥ ॥इतिसप्तमावरणं॥ ॥वज्राय॰शक्तये॰दंडाय॰खड्गाय॰
पाशाय॰अंकुशाय॰गदायै॰त्रिशूलाय॰पद्माय॰चक्राय॰ततस्त्र्यंबकमानस्तोक

इति मंत्राभ्यां रुद्रगायत्र्या चतुष्पाद्यर्चयेत्॥ आयनेतइति पुष्पमाला॥ आयनेतइ
ति स्तंब मित्रोग्निस्त्रिष्टुप्॥ अस्माकेभिः सत्वभिरिति धूपः॥ अस्माकेभिः कूर्मो विश्वेदेवास्त्रि
ष्टुप्॥ अग्निंनमेति दीपः॥ अग्निंनमा प्रगाथः सोमस्त्रिष्टुप्॥ स्वादुष्टइति नैवेद्यं॥ स्वादुष्टइ
ति इरिंबिठिरिंद्रो गायत्री॥ आचमनं॥ आरात्रिपार्थिवमित्यारात्रिकं॥ रात्रिरात्रिरनुष्टुप्॥
नमो महद्भ्य इति नमस्कारः॥ शुनःशेपो देवास्त्रिष्टुप्॥ प्रदक्षिणिदग्नीति प्रदक्षिणा॥ ई
गृत्समदः शाकंतको जगती॥ ईशाने किंचिन्नैवेद्यं त्यजेत्॥ चंडायनमइति॥ त्र्यंबकमिति
तांबूलं॥ प्रयाहं दीर्घमायुरित्यादि॥ दक्षिणावतामिति दक्षिणादानं॥ कक्षीवानूदा
नस्क्त इति त्रिष्टुप्॥ मानएकस्मिन्नागसीति प्रार्थना॥ त्रिशोक इंद्रो गायत्री॥ त्वंनः पश्चादि
ति विज्ञप्तिः॥ नर्गइंद्रः सतोबृहती॥ ततः प्रणवेन मूर्द्धनि पूजयेत्॥ दशाक्षरमंत्रेण पुष्पां २६
जलित्रयं दद्यात्॥ नदस्यमेति मुद्रा॥ अंतेवासी ब्रह्मचार्यगस्त्यस्त्रिष्टुप्॥ साष्टांगप्रणा
मपार्घदानं॥ देवदेव महादेव शंभो शिव शिवेश्वर॥ गृहाणार्घं महादेव पूजासंपूर्त्तिं

हितवोस्वशक्तिसहितारुद्राःपादेयत्रप्रतिष्ठिताः।तेगृह्णंतुमयादत्तंमिममर्घ्यंनमो
नमः।ततोयथाशक्त्यायजमानेनजपःकर्त्तव्यः॥जपनिवेदनमंत्रः॥गुह्यातिगुह्यगो
प्तस्त्वंगृहाणास्मत्कृतंजपं॥सिद्धिर्भवतुमेदेवत्वत्प्रसादाद्धृदिस्थिते॥१॥ ॥ ॥
॥इतिसमाप्तः॥ ॥यादृष्टमितिन्यायान्नमेदोषः॥ ॥शुभंभवतु॥ ॥छ॥ ॥
॥अथयोगिनीपूजं॥वायुकोणेश्वेतवस्त्रमध्येचतुःषष्टिकोष्टकानालिख्य॥ ॥पूर्वको
ष्टेब्राह्मी१आग्नेय्यांकौमार्यै२दक्षिणेवाराह्यै०॥३नैर्ऋत्यांइंद्राण्यै०४पश्चिमेवैष्णव्यै०५॥
वायव्यांचामुंडायै०६उत्तरेमाहेश्वर्यै७ईशान्यांमहालक्ष्म्यै०८शेषकोष्ठेयथाक्रमेणस्था
पनं॥डाकिन्यै०९शाकिन्यैनमः१०नंदायै०११सुनंदायै०१२अक्कागायै०१३अल्लिकायै०१४
दुर्गायै०१५भगवत्यै०१६भद्रायै०१७॥चर्ज्जलिकायैनमः१८जंभकायै०१९महोदर्यै०२०
पिप्पलिकायै०२१सुभद्रायै०२२दुःखहरायै०२३नंदिन्यै०२४जयंत्यै०२५गौर्यै०२६हरायै०
२७पद्मायै०२८सावित्र्यै०२९मेधायै०३०जयायै०३१विजयायै०३२स्वधायै०३३स्वाहायै०३४

धूम्राक्ष्यै०३५ममृण्यै०३६मातरायै०३७धृत्यैनमः३८अरायै०३९विश्वजनन्यै०४०विश्वामित्र्यै०४१लोक
पालिन्यै०४२गांगेयैन०४३गुप्तायै०४४गुकूल्फलायै०४५गंगायै०४६द्यावर्त्यै०४७शशिन्यै०४८गौर्यै०४९दे
व्यैनमः५०महादेव्यै०५१पवित्रायै०५२पद्मावल्यै०५३मातायै०५४मायै०५५परामायै०५६मंगलायै०५७
देवतायै०५८नार्गव्यै०५९लोकजनन्यै०६०अंतरायै०६१खेचरायै०६२घोरायै०६३सुरागिन्यै०६४
॥इतिचतुःषष्ठियोगिनीपूजा॥ ॥मुद्रालक्षणं॥ ॥हस्ताभ्यामंजलिंकृत्वानामिकामूलपर्वणोः।
अंगुष्ठौनिक्षिपेत्सेयंमुद्रात्वावाहनीस्मृता॥१॥अधोमुखादियंचेत्स्यात्स्थापिनीमुद्रिकामता॥२॥
उछ्रितांगुष्ठमुष्ट्योस्तुसंयोगात्संनिधापनी३अंतःप्रवेशितांगुष्ठासैवसंरोधिनीमता४उत्तानमुष्टि
युगलासंमुखीकरणीमता५देवतांगेषडंगानांन्यासःस्यात्सकलीकृतिः॥११सव्यहस्तकृतामुष्टि
र्दीर्घाधोमुखतर्जनी।अवगुंठनमुद्रेयमभितोभ्रामितायदा१२अन्योन्याभिमुखाश्लिष्टकनिष्ठाना २१
मिकाःपुनः।तथैवतर्जनीमध्याधेनुमुद्रासमीरिता।अमृतीकरणंकुर्यात्तयासाधकसत्तमः॥१३॥
अन्योन्यग्रथितांगुष्ठप्रसारितपरांगुली।महामुद्रेयमुदितापरमीकरणेबुधैः॥१४॥ ॥ ॥